UGC - CARE LISTED

ISSN-2321-7626
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# पाणिनीया
# PĀṆINĪYĀ

त्रैमासिक-सान्दर्भिक-पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

**UGC - CARE Listed**

Vol. XXXV, Year X
ISSN-2321-7626
फरवरी-अप्रैल, 2023

# पाणिनीया
# PĀṆINĪYĀ

त्रैमासिक-सान्दर्भिक-पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः**
**देवासमार्गः, उज्जयिनी, मध्यप्रदेशः, भारतम्**

**अणुसङ्केतः** (E-mail) - mpsvv.paniniya@gmail.com
**अन्तर्जालपुटम्** (Website) - www.mpsvv.ac.in

**प्रधानसम्पादकः**
प्रो. विजयकुमारः सी.जी.
कुलपतिः

**प्रबन्धसम्पादकः**
डॉ. तुलसीदासपरौहा
सह आचार्यः विभागाध्यक्षश्च
संस्कृतसाहित्यविभागः

**सम्पादकः**
**डॉ. उपेन्द्रभार्गवः**
सहायकाचार्यः
ज्योतिषज्योतिर्विज्ञानविभागः
योगविभागाध्यक्षः (प्र.) शोधसमन्वयकश्च

**सह-सम्पादकाः**

**डॉ. पूजा उपाध्यायः**
सहायकाचार्या
विशिष्टिसंस्कृतविभागः

**डॉ. अखिलेशकुमारद्विवेदी**
सहायकाचार्यः प्र. विभागाध्यक्षश्च
वेद-एवं-व्याकरणविभागः

**डॉ. शुभम् शर्मा**
सहायकाचार्यः प्र. विभागाध्यक्षश्च
ज्योतिष-एवं-ज्योतिर्विज्ञानविभागः

**डॉ. संकल्पमिश्रः**
सहायकाचार्यः
वेद-एवं-व्याकरणविभागः

**प्रकाशकः**
कुलसचिवः
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

**सदस्यताशुल्कम्**

वार्षिकम् - 3000/-
मूल्यम्  - 725/- डाकव्ययः 50/-

**MANGUBHAI PATEL**
GOVERNOR, MADHYA PRADESH
BHOPAL - 462052

**मंगुभाई पटेल**
राज्यपाल, मध्यप्रदेश
भोपाल - 462052



# संदेश

हर्ष का विषय है कि महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय उज्जैन द्वारा शोध पत्रिका पाणिनीया का प्रकाशन किया जा रहा है।

शोध पत्रिका मानव ज्ञान को दिशा प्रदान करने का प्रभावी साधन है। ज्ञान भण्डार को विकसित एवं परिमार्जित करने में सहयोगी होती है। पत्रिका की विषय सामग्री जिज्ञासा की संतुष्टि करती है। व्यावहारिक समस्याओं के समाधान की दिशा का दर्शन कराती है।

आशा है, शोध पत्रिका में प्रकाशित लब्ध प्रतिष्ठित विद्वानों, आचार्यों और शोध छात्रों के आलेख शोध परक तथ्य और जानकारी प्रस्तुत करने में सफल होगे।

**शुभकामनाएं,**

मंगुभाई पटेल

**( मंगुभाई पटेल )**

# कार्यालय, मंत्री, उच्च शिक्षा विभाग
## मध्यप्रदेश शासन

निवास : विंध्य कोठी, भोपाल (म.प्र.), दूरभाष : 0755-2430757, 2430457
मंत्रालय : कक्ष क्र. E-216, VB-III, द्वितीय तल, भोपाल - 462003 दूरभाष : 0755-2708682
उज्जैन कार्यालय : 1/1, मुंज मार्ग, फ्रीगंज, उज्जैन, दूरभाष क्र. 0734 - 4070900




## शुभकामना संदेश

अत्यन्त हर्ष का विषय है कि महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन द्वारा शोध पत्रिका "पाणिनीया" का प्रकाशन किया जा रहा है जो विश्वविद्यालय अनुदान आयोग यूजीसी सूची में दर्ज है। पत्रिका में देश विदेश के प्रतिष्ठित संस्कृत विद्वानों एवं शोधच्छात्रों के शोध पत्र प्रकाशित होते है। जिनका मूल आधार संस्कृत है।

यह पत्रिका निश्चित ही अपने लक्ष्य को प्राप्त करेगी ऐसी मेरी आशा हैं।

पत्रिका प्रकाशन पर महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय परिवार को हार्दिक शुभकामनॉए।

(डॉ. मोहन यादव)

# कुलपतिसन्देशः

**पावकानः सरस्वती वाजेभिर्वाजिनीवति।**
**यज्ञं वष्टुधिया वसुः॥**

सकलविद्यानामाश्रयभूतं विद्यते व्याकरणशास्त्रम् । शास्त्रपरम्परायां निखिलमपि ज्ञानं संस्कृतभाषायां निबद्धं वर्त्तते। सा च भाषा व्याकरणाश्रिता। भाषायाः स्वरूपं सौन्दर्यञ्च शब्देषु परिलक्ष्यते। शब्दानां परिष्कार एव व्याकरणस्य प्रमुखं प्रयोजनं विद्यते। यतो हि शब्दानां परिष्कारेण भाषापरिष्कारः स्वयमेव जायते। अत उच्यते ''मुखं व्याकरणं स्मृतम्'' इति। काव्यशास्त्रे ध्वनिशब्दव्यवहारः वैयाकरण इव क्रियते यथा काव्यप्रकाशे संकेतितशब्दानां विभागः ''सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा'' महाभाष्यानुरूपः ''चतुष्टीयशब्दानां प्रवृत्तिरिति रीत्या कृतः। शब्दस्वरूपविवेचने वाक्यपदीयस्योद्धरणं'' नहि गौः स्वरूपेण गौ'' अर्थनिर्धारणे च ''संयोगो विप्रयोगश्च'' इति पठ्यते । भामहः वामनश्च शब्दशुद्ध्यधिकरणविषये ''सम्प्रति काव्यसमयं शब्दशुद्धिञ्च दर्शयितुं प्रायोगिकाख्यमधिकरणमारभ्यते'' इति लिलिखतुः।

अतश्चेदं वक्तुं प्रभवामः यत् सकलमपि शास्त्रजातं निश्चयेन शब्दाश्रितमेव। शब्दशुद्धौ शास्त्रशुद्धिरिति मनीषिणां मेधा मनुते। अतोऽहं विश्वसिमि यत् महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालस्यास्य सान्दर्भिकमूल्याङ्किता शोधपत्रिकेऽयं पाणिनीया 'शुद्धशब्दैः' समन्विता भूत्त्वा विदुषां मनांसि तोषयेत् । अस्मिन् पञ्चत्रिंशत् संख्यात्मकेऽङ्के शोधपत्रप्रस्तोतृणां सम्पादकानां शोधार्थिनां सुधीपाठकानाञ्च कृते पत्रिका प्रकाशनावसरे भगवतः श्रीमन्महाकालस्य कृपाप्रसादः भवतु इति कामये।

**( आचार्यविजयकुमारः सी.जी. )**
कुलपतिः

# सम्पादकीयम्

**वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥**

सारस्वतसमाराधनस्य प्रमुखं सोपानं भवति लेखनम् । तच्च भारतीयज्ञानपरम्परयापोषितं भवति चेत् निश्चयेन लोकोपकारकं भवति। भारतस्य मनीषिणां कृते वेदव्याकरणज्योतिषशिक्षाकल्पानां उपनिषत्पुराणरामायण-महाभारतादीनां धर्मशास्त्रार्थशास्त्रराजनीतिप्रभृतीनां दर्शनशास्त्राणाञ्च विशालतमं ज्ञानसमुद्रं विद्यते लेखनाय। वस्तुतस्तु लेखनं समाजस्य राष्ट्रस्य च मार्गदर्शनं करोति। शोधार्थिनः छात्राः प्राध्यापकाश्च लेखनमाध्यमेनैव स्वीकायान् विचारान् प्रकटयन्ति अन्येषां चिन्तकानां शिक्षाविदां विचाराणि स्वीकुर्वन्ति च। लेखनं इतिहासस्य प्रमाणरूपेण प्रकटीभवति येन पुरा घटितानां विशिष्टैतिहासिकघटनानां साक्ष्यानि प्राप्यन्ते । अनेनैव विश्वस्य विविधसभ्यतासंस्कृतीनां प्रादुर्भावनिरसनानाञ्च प्रमाणानि लब्धानि। तल्लेखनं वृक्षाणां पत्रेषु वल्कलेषु तालभुर्जादिपत्रेषु पाषाणताम्रकांस्यादिपत्रेषु लिख्यते स्म अधुनापि च तथैव लिख्यते। एकमपिलिखिताक्षरं अध्येतृणां कृते अमृतबिन्दुतुल्यं भवति अतः लेखनं सान्दर्भिकं प्रमाणपुरस्सरं सत्ययुक्तं तथ्यात्मकं साधुकाव्ययुतञ्च भवतु इति धिया लेखकैः महता प्रयत्नेन एकैकस्य लेखस्य लेखनं क्रियते। अत उच्यते नीतिज्ञैः ''शतं वद एकं मा लिख! मा लिख!'' इति। यतोऽहि एकशब्दलिखितस्य महत्त्वं शतसंख्याकवचनानामपि श्रेष्ठतमं भवति अतः लेखनं स्वयमेव महत्त्वमाधत्ते।

अहं विश्वसिमि यत् महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्यास्य पाणिनीयाख्यायां शोधपत्रिकायामस्यां तत्रभवतां भवतां सरस्वतीसमुपासकानां विदुषां शोधपूर्णलेखानि अध्येतृणां संशोधकानां सुविज्ञानां पाठकानाञ्च उत्तरोत्तरं ज्ञानवर्द्धनं करिष्यन्ति इति।

**॥ तन्मे मनः शिवसङ्कल्पमस्तु ॥**

विदुषां वशंवदः

**डॉ. उपेन्द्रभार्गवः**

# अनुक्रमणिका


| | |
|---|---|
| सन्देश | (iii) |
| शुभकामनासन्देशः | (iv) |
| कुलपतिसन्देशः | (v) |
| सम्पादकीयम् | (vi) |
| अनुक्रमणिका | (vii) |

**संस्कृत-प्रभागः**

1. धम्मपदोक्तो ब्राह्मणपदलक्षणविचारः 1
   **- डॉ. सम्भाजिः विठ्ठलः पाटीलः**
2. 'चिपिटकचर्वणे' प्रतिफलितं समाजचित्रम् 7
   **- डॉ. अनूप कुमार रानो**
3. गरुड़पुराणे समासचर्चा 15
   **- शुभलक्ष्मी आचार्य**
4. रघुवंशमहाकाव्ये धर्मरूपपुरुषार्थविचारः 20
   **- प्रियंका बारीक**
5. नाट्यशास्त्रस्य अनुसरणं दशविध-रूपकेषु 25
   **- ज्योतिष्मयी वि.**
   **- डॉ. श्रीपाद् हेच् घलिगि**
6. प्राचीनभारतीयशिक्षणप्रणाल्याः वर्तमानकाले प्रासङ्गिकता 32
   **- डॉ. हेमन्तकुमार चतुर्वेदी**
7. भगवद्गीतानुसारं स्थितप्रज्ञलक्षणानि 38
   **- देवज्योति-कुण्डुः**
8. वेदेषु रसायनविज्ञानम् 43
   **- कृष्णकुमारपाण्डेयः**
9. वेदेषु शिल्पविज्ञानम् 50
   **- केशवकुमार पाण्डेयः**

10. वास्तुशास्त्रदृष्ट्या बहुतलीयावासीयभवनेषु कक्षविन्यासः 56
**- विनयकुकरेती**
**- डॉ. देशबन्धुः**
11. न्यावैशेषिकदर्शनयोः स्मृतिः 66
**- हेमन्तः पण्ड्या**

**हिन्दी-प्रभागः**
12. भास के रूपकों में नारी शिक्षा एवं समाज 75
**- डॉ. नीमा जोशी**
13. आयुर्वेद का प्राचीन महत्त्व एवं वृहत्त्रयी में आयुर्वेद का वर्णन 80
**- गौतम अधिकारी**
**- राहुल शर्मा**
**- डॉ. अनुराग पाण्डेय**
14. गीता में कर्मयोग की अवधारणा एवं आचार्य विनोबा भावे का चिन्तन 87
**- राहुल शर्मा**
**- गौतम अधिकारी**
**- डॉ. अनुराग पाण्डेय**

**आंग्ल-प्रभागः**
15. The brief Survey of contradiction views of Udayana`s in Nyāyakusumāñjai 92
**- Dr. Ramen Bhadra**
16. Working Women Health Status : A Review on Challenges and its Solution 98
**- Prachi Bansal**
**- Prof. A.C. Kar**
17. Vishavegas on Stage-Scientific Theories in Representation 105
**- Dr. Ajitha T.S**
18. Historical and Philosophical Perspective of Kashmir Shaivism 112
**- Dr. Kartar Chand Sharma**
19. The Perceptions of Elementary School Teachers Towards Inclusive Education of Children with Special needs of Udham Singh Nagar 118
**- Ashok Upreti**
**- Prof. Bheema Manral**

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# धम्मपदोक्तो ब्राह्मणपदलक्षणविचारः

**डॉ. सम्भाजिः विठ्ठलः पाटीलः***

**सारांशः -** धम्मपदस्थेषु षड्विंशत्यां वर्गेषु अन्तिमो वर्गो वर्तते ब्राह्मणवग्गो इति। तत्र ब्राह्मणपदस्य यानि अपूर्वाणि निर्वचनानि बुद्धादिभिर्महाजनैरुपदिश्यन्ते तेषामवलोकनेन समाजस्थायाः ब्राह्मणपदविषयिण्याः भ्रान्तधारणायाः अपाकरणं भवेत् । वेदाभ्यासकः उत ब्रह्मवेत्ता इति यौगिकार्थः धम्मपदे न स्वीक्रियते । सुप्रसिद्धस्य वर्णवाचकस्य ब्राह्मणपदस्यैव निर्वचनकथनमत्र दृश्यते। ग्रन्थस्थानामन्येषां वर्गाणामपेक्षया वर्गोऽय विशालः। वर्गेऽस्मिन् 41 संख्यका गाथास्सन्ति। एतया गाथासंख्ययाप्यस्माभिरवगन्तुं शक्यं यत् ब्राह्मणपदनिर्वचन-विषयकः कियान् आग्रहः आदरश्च दृश्यते ग्रन्थरचयितृणाम्। तत्रस्थानां लक्षणानां विचारोऽय प्रस्तूयते ।

**कुञ्जीशब्दाः -** धम्मपदम्, ब्राह्मणपदम्, संशुद्धत्वम्; क्षमावत्वम्, त्रिपिटकम्, बौद्धदर्शनम्

## धम्मपदम्

बौद्धधर्मस्य अतीवमहत्त्वपूर्णो ग्रन्थो नाम त्रिपिटकम् । त्रिषु विभागेषु विभजनात् तस्य त्रिपिटकमिति अन्वर्थमभिधानम् । विनयपिटकम् सुत्तपिटकम् अभिधम्मपिटकं चेति तस्य त्रयः पिटकाख्या विभागाः। विनयपिटकाख्ये भागे सङ्घव्यवस्थायाः नियमाः पञ्चसु निकायनामकेषु विभागेषु संकलिताः सन्ति। सुत्तपिकाख्ये विभागे बुद्धस्य सामान्योपदेशः पञ्चसु निकायनामकेषु विभागेषु संकलितः। अभिधम्मपिटकाख्ये विभागे बौद्धदर्शनस्य वैज्ञानिकपद्धत्या कृतं प्रतिपादनं सप्तसु निकायनामकेषु विभागेषु च संकलितं दृश्यते। तत्र सुत्तपिटकमिति विभागस्य खुद्दकनिकायनामके प्रकरणे धम्मपदमित्यस्य ग्रन्थस्य

*सहायकप्राध्यापकः, वसन्तराव नाईक शासकीय कला एवं समाजविज्ञान संस्था, नागपुरम्

अन्तर्भावो भवति। अयं बौद्धधर्मियाणां पवित्रतमो ग्रन्थः। बहुसंख्यका भाविकाः बौद्धजनाः धम्मपदस्य नित्यपारायणं कुर्वन्ति। अस्य रचयिता कोऽपि विशिष्ट एक एव जनो न। विभिन्नप्रसङ्गेषु भगवद्बुद्धादिभिः बहुभिर्विद्वद्भिः प्रोक्तानां सुवचसां संग्रहणमस्मिन् ग्रन्थे वर्तते। अस्य ग्रन्थस्य बुद्धविचाराणां सारभूतत्वात् बौद्धधर्मे अस्य स्थानमनन्यसाधारणम् ।

ग्रन्थस्थविचाराणां सर्वव्यापकत्वात् विश्वकल्याणसामर्थ्यत्वाच्च न केवलं बौद्धधर्मे अपि तु समस्त विश्वे अस्य अङ्गीकारः किञ्च एवं प्रति महान् आदरो दरीदृश्यते। धम्मपदम् इत्यस्य अर्थो धर्ममार्ग इति। सद्धर्ममार्गं प्रवेष्टुं प्रचोदयतां महाजनोक्तानां सुवचसां संग्रहणात् धम्मपदम् इति ग्रन्थाभिधानं सार्थं वर्तते। । ग्रन्थोऽसौ विद्यते पालीभाषायाम् । ग्रन्थेऽस्मिन् यमकवग्गो, अप्पमादवग्गो, चित्तवग्गो, पुप्फवग्गो इत्यादिक्रमेण 26 प्रकरणानि सन्ति यानि वग्गो इति नाम्ना व्यवह्रीयन्ते। ग्रन्थन्तर्गताः श्लोका गाथा इति नाम्ना प्रसिद्धाः। ताश्च गाथाः 423 इति संख्यकाः।

**धम्मपदोक्तानि ब्राह्मणलक्षणानि**

धम्मपदस्थेषु षड्विंशत्यां वर्गेषु अन्तिमो वर्गो वर्तते ब्राह्मणवग्गो इति। तत्र ब्राह्मणपदस्य यानि अपूर्वाणि निर्वचनानि बुद्धादिभिर्महाजनैरुपदिश्यन्ते तेषामवलोकनेन समाजस्थायाः ब्राह्मणपदविषयिण्याः भ्रान्तधारणायाः अपाकरणं भवेत् । वेदाभ्यासकः उत ब्रह्मवेत्ता इति यौगिकार्थः धम्मपदे न स्वीक्रियते । सुप्रसिद्धस्य वर्णवाचकस्य ब्राह्मणपदस्यैव निर्वचनकथनमत्र दृश्यते। ग्रन्थस्थानामन्येषां वर्गाणामपेक्षया वर्गोऽय विशालः। वर्गेऽस्मिन् 41 संख्यका गाथास्सन्ति। एतया गाथासंख्ययाप्यस्माभिरवगन्तुं शक्यं यत् ब्राह्मणपदनिर्वचनविषयकः कियान् आग्रहः आदरश्च दृश्यते ग्रन्थरचयितृणाम्। तत्रस्थानां लक्षणानां विचारोऽय प्रस्तूयते -

**मनोवाक्कायैः संशुद्धत्वम**

शौचमिति गुणं प्रति सर्वत्र महान् आदरो दृश्यते। भगवद्गीतायामपि दैवीसंपदि अस्य अन्तर्भावो दृश्यते। तद्यथा - 'तेजः क्षमा धृतिः **शौचम**द्रोहो नातिमानिता'।[2] पातञ्जलयोगसूत्रेऽपि '**शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि नियमाः**'[3] इति सूत्रेण नियमाख्ये योगाङ्गे अस्य विशेषोल्लेखः प्राप्यते। धम्मपदोक्ते ब्राह्मणलक्षणेऽपि एतत् प्राधान्येन स्वीक्रियते। तच्च शौचत्वं न केवलं दैहिकम् अपि तु कायिक-वाचिक-मानसिक-भेदेन त्रिविधम् । एतेषु त्रिष्वपि स्तरेषु सर्वथा यो विगतमलः स ब्राह्मणपदवाच्यः इति धम्मपदे उच्यते। यः वाक्कायमनोभिः कदाचिदपि दुष्कृत्यं नाचरति न वा चिन्तयति, यश्च वाक्कायमनांसि इत्येषु त्रिष्वपि स्थलेषु संयतः अस्ति, स जन एव ब्राह्मणपदवाच्यः वर्तते।[4]

**क्षमावत्वम्**

कश्चन जनो माम् अपशब्दैः अदूषयत्, मां प्राताडयत्, मां पराभवत्, माम्

अलुण्ठयत् इत्येवंप्रकारकं मनसि यः चिरं स्थापयति तस्य चित्तस्थं वैरं कदापि नोपशाम्यति।[5] किन्तु एतत्सर्वं यो विस्मरति किञ्च दोषवतो जनान् च क्षाम्यति तस्यैव वैरोपशमो भवति।[6] अवैरेणैव वैरभावो नश्येत् । कदाचिदपि वैरेण वैरं नोपशान्तं भवतीत्येतद् यो जानाति तस्यैव सर्वे कलहाः लयं गच्छन्ति।[7] जगतः क्षणभङ्गुरत्वं यो विजानीते स एव सर्वान् दोषकृतः क्षमया उपकरोति। क्षमाबलमित्येव यस्य महती सेना वर्तते, क्षमया स सर्वदा सर्वत्र च जयति, स जन एव ब्राह्मणपदवाच्यः वर्तते।

**क्रोधहीनत्वम्**

यः उन्मत्तं क्रोधं रथमिव नियन्त्रयति स एव सारथिरिति संज्ञकः। यस्तु केवलं रथमेव नियन्त्रयति स रज्जुग्राहकः इत्युच्यते। 'अक्कोधेन जिने कोधम्'[8] इत्युपदेशेन एष यः क्रोधनामकः अरिः सः अक्रोधाख्येन उपायेन पराजेतुं शक्य इति धम्मपदे संसूच्यते। यो विगतक्रोधः स ब्राह्मणः।[9]

**शीलसंपन्नत्वम्**

चन्दनं तगरपुष्पं कमलपुष्पमित्यादीनां गन्धस्य अपेक्षयापि शीलगन्धः श्रेयान् वर्तते। यतः एतेषां यो गन्धः तस्य काचित् सीमा भवति। एतेषां गन्धो वायोः दिशैव प्रवहति न तु तद्विरुद्धम् । किन्तु शीलगन्धः सर्वाः दिशः प्रपूर्य देवलोकमपि गच्छति। यः एतेन शीलगन्धेन संपन्नः स एव ब्राह्मणपदवाच्यः।[10]

**दान्तव्यम्**

यथा कृषीवलः क्षेत्रस्थं जलं नियन्त्रयति यथा शस्त्रकारः बाणं परिणमयति यथा शिल्पी काष्ठं नमयति तथा यः आत्मानं दमयति स जितेन्द्रियो ब्राह्मणो भवति। आत्मा स्वयमेव आत्मनः स्वामी भवति इति विज्ञाय यः आत्मदमनं करोति सः दुलर्भं नाथं लब्धुं शक्नोति ।[11]

**व्रतित्वम्**

यः व्रतस्थः शीलसंपन्नः बहुश्रुतः, दान्तः, अन्तिमदेहधारी च वर्तते, स जनः ब्राह्मणपदवाच्यः वर्तते नान्यः। जीवने यावत्पर्यन्तं चिन्तितसंकल्पं मनुष्यो व्रतरूपेण नाचरति तावत्पर्यन्तं स निःश्रेयसः प्राप्तिं कर्तुं न शक्नोति। तच्च व्रतं दीर्घकालपर्यन्तं नैरन्तर्येण श्रद्धापूर्वकं यद्याचर्यते तर्ह्येव तत्फलदं भवति। अतो यः इत्थम्भूतो व्रती स एव ब्राह्मणः । दमो नाम बाह्येन्द्रियनिग्रहः । येन सकलेन्द्रियजयः साधितो वर्तते स जितेन्द्रिय ब्राह्मणसंज्ञको भवति।[12]

**वाग्गिमत्वम्**

यः कोमलाम् , ऋज्वीं, विनयसंपन्नां, सत्यमयीं मितां च वाणीं प्रयुङ्क्ते, यस्य वाक् कमपि न हिनस्ति, स जन एव ब्राह्मणपदवाच्यः वर्तते। ब्राह्मणो हितं मनोहारि च वचः प्रयुङ्क्ते यच्च दुर्लभम् ।[13]

**अहिंसात्वम्**

सकलमपि प्राणिमात्रं दण्डादुद्वेगं प्राप्नोति मृत्योश्च बिभेति। सर्वस्य च जीवितं प्रियं भवति। सर्वं जन्तुमात्रं सुखं कामयते। एतत्सर्वं विज्ञाय यः आत्मन इव सर्वान् पश्यति, अशेषप्राणिनः प्रति सर्वथा दण्डत्यागं करोति, कदापि हिंसाचरणं न करोति न वा कमपि तदर्थं प्रचोयदयति, स जनः एव ब्राह्मणपदवाच्यः वर्तते।[14]

**असामान्यत्वम्**

यो विरोधकेषु निवसन् अपि तैस्सह सख्यमाचरति, दण्डवत्सु निवसन्नपि स्वयं दण्डहीनस्तिष्ठति, संग्रहशीलेषु जनेषु निवसन्नपि अपरिग्रहव्रतमाचरति, उत्सुकेषु जनेष्वनुत्सुको भूत्वा व्यवहरति सः असामान्य एव। उपर्युक्तगुणसम्पन्नः असामान्यो जन एव ब्राह्मणपदवाच्यो वर्तते।[15]

**विगतमलत्वम्**

दण्ड-जटा-मृगचर्म-धारणादिभिः बाह्याङ्गालङ्करणैः, शरीरे पङ्कभस्मादिलेपनेन, अन्नवस्त्रादित्यागेन, आत्यन्तिकशरीरक्लेशेन आहोस्विद् ब्राह्मणकुले जन्ममात्रप्रापणेन कोऽपि ब्राह्मणो न भवति, यस्सर्वथा विगतमलो नाम काय-वाक्-मनोमलान् सर्वथा विसर्जयति, यः सत्यवान्, शुचिमान् स एव ब्राह्मणपदसंज्ञको भवति।[16]

**देहवासनाहीनत्वम्**

मनुष्यशरीरं हि नाम व्याधिसदनं, पूतिगन्धयुतं किञ्च क्षणभङ्गुरं च वर्तते।[17] शरीरं हि अस्थिनगरं यच्च मांसरुधिरादिभिः लिप्तं वर्तते यत्र च जरा, मृत्युः, मानादयः निलीय तिष्ठन्ति।[18] क्षुद्रोऽयं देहः अचिरादेव चेतनाविहीनो भूत्वा निरुपयोगि काष्ठमिव भूमिं पतिष्यति।[19] एतत्सर्वं विज्ञाय यः मृण्मयानि जीर्णवस्त्राणि धरति, यस्य कायः कृशत्वं प्राप्तः वर्तते, देहविषयकं ममत्वभावं यः सर्वथा जहाति स एव ब्राह्मणपदसंज्ञयकः वर्तते।[20]

**अपरिग्रहत्वम्**

लोके विहरन् यः स्थूलं वा सूक्ष्मं, ह्रस्वम् उत दीर्घं, मङ्गलम् उत अमङ्गलं वस्तु कस्मादपि याचते, न किमपि स्पृहयति, यावत्पर्यन्तं कश्चन न प्रार्थयते तावत्पर्यन्तं न स्वीकरोति, स अपरिग्रहव्रतम् आचरन् जनः एव ब्राह्मणपदसंज्ञकः अस्ति।[21]

यस्य पुरतः पृष्ठतः वा कापि आशा नावशिष्टा, यः सर्वथा अकिञ्चनः अस्ति, विगततृष्णत्वात् सर्वदा सन्तुष्टः भवति, येन एषः दुस्तरः दुर्गमश्च संसारः उत्तीर्णः, अभेद्यं मोहजालं विदीर्णं, लोभादिभिः यः न कम्पते, ध्यानरतः सन् यः निश्शङ्कः जातोस्ति, स जन एव ब्राह्मणपदसंज्ञकः अस्ति।

**अनासक्तत्वम्**

स्रक्चन्दनवनितादयः इहलोकस्थाः, अमृतस्वर्गादयः परलोकस्थाश्च आशाः येन परित्यक्ताः, लोकविषयकम् इहलोकविषयकं वा आकर्षणं येन हीनं वर्तते, यः

निर्भयः, अनासक्त, निःसङ्गः, जागृतः, बुद्धः, विमुक्तः, शोकहीनः मानवीयबन्धनानां त्यागं कृत्वा दिव्यबन्धनानामपि यः तिरस्कर्ता, अस्मिन् एव जीवने सर्वेषां संचितदुःखानां यः क्षयं करोति, पुण्यपापयोः विषये यः निःसङ्गः स जन एव ब्राह्मणपदसंज्ञकः अस्ति।[22]

**निलोभत्वम्**

चन्द्र इव यः विगतमलः, शुद्धः, प्रसन्नः, स्वच्छः वर्तते यस्य सकलजन्मनां कामनाः विनष्टाः, भोगानां त्यागकारणेन यस्य पुनर्जन्म नास्ति, यश्च अनिकेतः, यः परिव्राजकरूपेण जीवति, गृहस्थैः तथैव परिव्राजकैः सहापि यस्य सम्बन्धः नास्ति, यः अनाश्रितः स जन एव ब्राह्मणपदसंज्ञकः अस्ति।[23] यथा कमलपत्रे वारिबिन्दुः स्थातुमक्षमः तथैव भोगविषयेषु सः किञ्चिदपि अवलिप्तो न भवति। सः वीरः पराक्रमेण सकलं तृष्णाप्रवाहं भिनत्ति, कामनाः दूरीकरोति, संस्कारान् च क्षिणोति। यथा सूच्यग्रभागे वालुकाकणाः न स्थातुं प्रभवन्ति तथैव तस्य मनुष्यस्य रागलोभादयः विकाराः व्यपगताः भवन्ति।

**अनिकेतत्वम्**

सर्वानपि संकल्पान्, सकलाः कामनाः विहाय यः गृहं प्रजहाति, परिव्राजकव्रतमाचरति, येन निखिलतृष्णाः समापिताः जन्मचक्रञ्च भिन्नं स असामान्यो जन एव ब्राह्मणपदसंज्ञको भवति।[24] न केवलं स गृहं प्रजहात्यपि तु गृहस्थागृहस्थयोरुभयोरपि सङ्गं त्यजति, अनाश्रितस्सन् विगतेच्छो जीवति।[25]

**परमार्थज्ञत्वम्**

यो गम्भीरप्रज्ञः, मेधावी, धर्माधर्मयोः कोविदः, ध्यानी, शुद्धः, स्थिरः, कृतकृत्य, आस्रवरहितः, प्रशान्तः, परमार्थस्य ज्ञाता वर्तते स महाजन एव ब्राह्मणोपाधिकोऽस्ति।[26]

**परिपूर्णत्वम्**

यः सकलजीवस्य जन्ममरणयोर्द्रष्टा, उत्तमगतिं प्राप्तः, ऋषभः, प्रवरः, वीरः, निष्कम्पः, पूर्वजन्मनां ज्ञाता, स्वर्गतिदुर्गत्योः विज्ञाता, अन्तिमदेहधारी, कृतकृत्यः, अभिज्ञापरायणः च वर्तते स महाजन एव ब्राह्मणोपाधिकः अस्ति।[27] रागद्वेषयोः परित्यागं कृत्वा स प्रशान्तो निरुपाधिको भवति।[28] तस्य गतिं ज्ञातुं मनुष्या गन्धर्वा उत देवा अपि अक्षमा भवन्ति। सः अर्हदिति अवस्थां प्राप्नोति। स परिपूर्णतामापन्न एव ब्राह्मणः।[29]

**उपसंहारः**

ब्राह्मणकुले जन्मस्वीकरणात् आहोस्वित् ब्राह्मणपितृभ्यां जननात् कस्यापि ब्राह्मणत्वं धम्मपदेन नोद्घोष्यते। पौनः पुन्येन जन्मकृतब्राह्मणत्वस्य निषेध एव तत्र परिलक्ष्यते। यः धम्मपदोक्तलक्षणयुतो वर्तते स एव ब्राह्मण इति धम्मपदसिद्धान्तः। यथा -

**'न जटाहि न गोत्तेन न जच्चा होति ब्राह्मणो'**[30] जटादिभिः बाह्यलक्षणैरपि मन्यमानस्य ब्राह्मणत्वस्य निषेधो धम्मपदे दृश्यते - **'किं ते जटाहि दुम्मेध किं ते अजिनसाटिया'**[31] केवलैः जटा-मृगचर्मादिभिः यः आत्मानं ब्राह्मणं मन्यते तस्य धिक्कारोऽपि धम्मपदे अवलोक्यते। तादृशलक्षणयुतस्य ब्राह्मणंमन्यमानस्य कृते धम्मपदे उपदिश्यते यत् बाह्याकृतेः अलङ्करणं विहाय सत्यधर्मादिभिः यः पूतो भवति स एव ब्राह्मणः, अतः तदाचर इति।

**सन्दर्भाः**


1. धम्मपदम्, 5
2. भगवद्गीता, 16.1
3. पातञ्जलयोगसूत्रम् , 2.32
4. यस्स कायेन वाचा मनसा.....धम्मपदं 391
5. तत्रैव, 3
6. तत्रैव, 4
7. तत्रैव, 5
8. तत्रैव, 223
9. यो वे उप्पतितं कोधं तत्रैव, 222
10. चन्दनं तगरं वापि उप्पलं अथ तत्रैव....55
11. तत्रैव, 160
12. अक्कोधनं वतवन्तं सीलवन्तं.... तत्रैव, 400
13. अक्कसं विञ्ञापनिं गिरं सच्चं तत्रैच...408
14. त निधाय दण्डं भूतेसु तसेसु तत्रैव...405
15. अविरुद्धं विरुद्धेसु..... तत्रैव 406
16. न जटाहि न गोत्तेन न जच्चा....तत्रैव 393
17. तत्रैव, 148
18. तत्रैव, 150
19. तत्रैव, 41
20. पंसुकूलधरं जन्तुं किसं धमनिसंथतं.... तत्रैव 395
21. योध दीघं वा रस्सं वा अणुं थूलं तत्रैव, 409
22. आसा यस्स न विज्जन्ति अस्मिं लोके परम्हि, तत्रैव 410
23. चन्दं व विमलं सुद्धं विप्पसन्नमनाविलं, तत्रैव, 413
24. योध कामं पहत्वान अनागारं परिब्बजे
25. तत्रैव 416
26. गंभीरपञ्ञं मेधाविं मग्गामग्गस्य कोविदं, तत्रैव 403
27. उसभं पवरं वीरं महेसिं विजिताविनं, तत्रैव 414
28. तत्रैव, 418
29. तत्रैव, 420
30. तत्रैव, 393
31. तत्रैव, 394

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# 'चिपिटकचर्वणे' प्रतिफलितं समाजचित्रम्

**डॉ. अनूप कुमार रानो***

**सारांशः -** चिपिटकचर्वणं पण्डितश्रीजीवन्यायतीर्थविरचितमेकम् आधुनिकं दृश्यकाव्यम् । नाट्यशास्त्रदृष्ट्या एतत् प्रहसनमेकम् । साहित्यं समाजस्य दर्पणमिति सर्वैः विद्वद्भिः स्वीकृतम् - ''लोकवृत्तानुकरणं नाट्यम् ...।''1 यथा ध्रुपदीसंस्कृतसाहित्ये समकालिकस्य समाजस्य प्रतिच्छविः अतीव स्पष्टरूपेण चित्रिता। अस्मिन् एकाङ्कविशिष्टे प्रहसने समकालिकस्य समाजस्य कीदृशं चित्रं प्रतिफलितं तदेव प्रबन्धेऽस्मिन् आलोचयिष्यामः।
**कुञ्जीशब्दाः -** प्रहसनम् , चिपिटकचर्वणम् , कोजागरी, नष्टचन्द्रः, स्वस्त्यनकर्म समाजः, व्रतानुष्ठानम् , पौराणिककथा, बङ्गदेशः।

**श्रीजीवन्यायतीर्थः**

आधुनिकसंस्कृतसाहित्ये बङ्गदेशस्य अवदानमतीव गौरवावहम् । हरिदाससिद्धान्तवागीशपञ्चाननतर्करत्न-श्रीजीवन्यायतीर्थ-क्षितीशचन्द्रचट्टोपाध्याय-रमाचौधरी- नित्यानन्दस्मृतितीर्थ-रमारञ्जनमुखोपाध्यायादयः आधुनिककवयः संस्कृतसाहित्यं पल्लवितं चक्रुः। पाण्डितवरेण्यः श्रीजीवीन्यायतीर्थः बङ्गदेशस्य 24 परगणामण्डलस्य भट्टपल्यां 1892- खृष्टाब्दे आचार्यपञ्चाननतर्करत्नस्य पुत्ररूपेण आविर्भूतोऽभवत् । पितुः चतुष्पाठ्यां सुपद्मव्याकरणस्य अध्ययनात् अनन्तरं कलिकाताविश्वविद्यालयतः बि.ए.-एम.ए.-इति उपाधिद्वयमलभत। ततः काशीनग्र्यां महामहोपाध्यायस्य राखालदासन्यायरत्नमहोदस्य समीपे न्यायशास्त्रस्य अध्ययनं चकार।

*सहकारी अध्यापकः, विभागीयः प्रधानश्च, संस्कृतविभागः चण्डीदास-महाविद्यालयः, खजुटिपाडा, वीरभूमः, पश्चिमबङ्ग

ततः ''आधुनिकतर्कविज्ञानस्य क्रमविवर्तनम्'' इति विषये गवेषणाबिन्धं विरचय्य कलिकाताविश्वविद्यालयतः पिएएच्.डि. इति उपाधिना भूषितोऽभूत् । गवेषणाकार्ये तस्य मार्गदर्शकः आसीत् पण्डितः हरप्रसादशास्त्री महोदयः। पण्डितोऽयं कलिकाताविश्वविद्यालये यादवपुरविश्वविद्यालये च अध्यापनमकरोत् । विद्वद्वरेण संस्कृतमहाविद्यालयस्य अध्यक्षपदमपि अलङ्कृतम् । आचार्यवरः बहुभिः उपाधिभिः भूषितोऽभूत् । यथा -

1. कालिकाताविश्वविद्यालयतः डि.लिट्.
2. वर्धमानविश्वविद्यालयतः डि.लिट्.
3. प्रयागविद्वत्सङ्गोष्ठ्याः महामहिमोपाध्यायः
4. नवद्वीपपण्डितसमाजतः व्याकरणशिरोमणिः
5. हाओडासंस्कृतसाहित्यमाजतः महाकविः
6. विश्वभारतीविश्वविद्यालयतः देशिकोत्तमः
7. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः महामहोपाध्यायः च।

अनेन विदुषा बहवः काव्यनाटकादयः विरचिताः -

श्रव्यकाव्यानि - 1. पाण्डवविक्रमम् 2. सारस्वतशतकम् 3. ऋतुचक्रचक्रमणम्।

दृश्यकाव्यानि - 1. महाकविकालिदासस् 2. श्रीशङ्कराचार्यवैभवम् 3. नागनिस्तारम् 4. साम्यसागरकल्लोलम् 5. विवेकानन्दचरितम् 6. निगमानन्दचरितम् 7. स्वातन्त्र्यसन्धिक्षणम् 8. सिन्धुसौवीरसंग्रामम् 9. श्रीकृष्णकौतुकम् 10. माधुरीसुन्दरम् 11. विधिविपर्यासम् 12. पुरुषपुङ्गवः 13. कैलासनाथविजयम् 14. गिरिधरसम्बर्द्धनम् 15. चण्डताण्डवम् 16. विवाहविडम्बनम् 17. क्षुत्क्षेमीयम् 18. भट्टसङ्कटम् 19. पुरुषरमणीयम् 20. चिपिटकचर्वणम् 21. शतवार्षिकम् 22. दरिद्रदुर्दैवम् 23. रागविरागम् 24. वनभोजनम् 25. रामनामदातव्यचिकित्सालयम् 26. नष्टहासम् 27. चौरचातुरीयम् ।

**चिपिटकचर्वणम्**

श्रीजीवन्यायतीर्थविरचितम् एकं हास्यरसात्मकं प्रहसनं चिपिटकचर्वणम् । कश्चित् कपाली नाम कृपणः श्रेष्ठी आसीत् । तस्य पत्नी रङ्गिणी, भृत्यः पङ्गुरामः, दासी मन्थरा च। पत्न्या सह तस्य साम्मनस्यं नास्ति। भृत्येन पथि परित्यक्तं छिन्नं पादुकायुगलं कुक्कुरमुखात् ग्रहणकाले शुना दष्टः सन् कपाली गृहमागतवान् । सारमेयं छत्रेण प्रहारकाले तस्य शतच्छिन्नं छत्रमपि विनष्टम् । तस्य चिकित्सार्थं तस्य पत्न्या रङ्गिण्या वैद्यः आहूतः। वैद्यं दक्षिणा दातव्या इति चिन्तयता कृपणेन कपालिना कौशलेन वैद्य विताडितः। अतः परं एकस्तान्त्रिकः चिकित्सार्थमागतवान् । एषः तान्त्रिकः श्रेष्ठिनं वञ्चयित्वा रङ्गिणीं

किञ्चित् धनं दातुमैच्छत् । तस्मात् सः विषप्रशमनाय पवित्रं स्वस्त्ययनकर्म कर्तुमुद्यतः। अस्मिन् कर्मणि स्थापनीये पवित्रे घटे सुवर्णं दातव्यं चिपिटकचर्वनञ्च कार्यम् । दत्तस्य सुवर्णस्य त्रिगुणवृद्धिर्भविष्यति। अनिच्छन् अपि लोभाकृष्टः कपाली दशतोलकपरिमितं सुवर्णं घटे प्रदत्तवान् । परन्तु तस्य पत्नी रङ्गिणी चिपिटकचर्वणं कर्तुं नैच्छत् । ततः छलेन तान्त्रिकः सुवर्णं गृहीत्वा रङ्गिणीम् अददत् । सुवर्णं प्राप्य चिपिटकचर्वणे तस्याः मतिरजायत, संसारे साम्मनस्यं च अभवत् ।

**समाजसमीक्षा**

❖ **धनतान्त्रिकः समाजः**

धनतान्त्रिकस्य समाजस्य चित्रमय श्रीजीवन्यायतीर्थेन सुन्दररूपेण अङ्कितम् । समाजे धनवैषम्यम् आसीत् । समाजे मूल्यबोधावक्षयस्य नग्नचित्रमय अङ्कितम् । श्रेष्ठिनः कपालिनः समीपे प्रभूतं धनमासीत्, परन्तु दासदासीनामवस्था अतीव शोचनीया। धनसम्पतौ नारीणामधिकारः नासीत् इति रङ्गिणीवचनात् ज्ञायते। दासदासीः प्रति प्रभोः व्यवहारः अतीव अपमानकरः। दरिद्राणामुपरि धनवताम् अत्याचारस्य निर्ममं वृत्तं परिस्फुटम् अर्वाचनीयंस्कृतसाहित्यस्य प्रतिच्छत्रम् । यथा भृत्य पङ्गुरामं प्रति कपालिनः उक्तिः-

''यावन्मुखं तावद्वचनम् । (वेत्रं गृहीत्वा) दास्याः पुत्र! पादुकाभिक्षु! त्वामद्य सशरीरं यमसदनं प्रेषयामि।''[2]

मन्थरां प्रति तस्य वाक्यम् -

''तूष्णीम्भव! अरे दुष्टे पापिष्ठे काकविष्ठे दासि''।

''किं वधिरासि? अरे गर्भदासि!''[3]

एतानि वाक्यानि समाजे निम्नवर्णेन सह उच्चवर्णस्य प्रतिष्ठागतं वैषम्यं प्रतिपादयति।

विविधजीविकाधारिणां जनानां कथा नाट्येऽस्मिन् प्राप्यते। यथा भृत्यः वणिक् वैद्यः तान्त्रिकः पाचकः इति। भिक्षणं समाजे निन्दनीयं कर्म आसीत् । तस्मात् कपाली पादुकाभिक्षुकं भृत्यं पङ्गुरामं अतीव तिरस्कृतवान् ।

समाजे प्रतिवेशिनः जनाः सहाय्यपरायणः उदारचरिताश्च आसन् । ग्रामस्य प्रतिद्वारं बभ्रम्यमाणाय पङ्गुरामाय कश्चन भद्रमुखः पल्लीवासी पादुकां प्रदाय उपकरोति- ''मम रोदनं प्रेक्ष्य तव हस्ते मम निग्रहञ्चाशङ्क्य दयावशेन भद्रमुखेन केनापि निजगृहाज्जीर्णं पादुकायुगलं मे दत्तम् ।''[4] तथा प्रतिवेशिनः एव तान्त्रिकम् अनुरोधं चक्रुः यत् - कपालिनं वञ्चयित्वा किञ्चिद्धनं रङ्गिणीं दातव्यम् । नाटकस्य अन्तिमे दृश्यते रङ्गिणी दशतिलकपरिमितं सुवर्णं लब्धवान् - ''लब्धं दशतोलकं सुवर्णं प्रतिवेशिभिर्दतम् ।''[5]

❖ **समाजे नारीणां स्थानम्**

अतिप्राचीनकालदेव समाजे नारीणां स्थानं न सम्मानास्पदमासीत् । विंशशतकेऽपि पितृतान्त्रिकसमाजस्य प्रतिविम्बं नाट्यकारेण चित्रितम् । विषयसम्पदे केवलं पुरुषाणामेव अधिकारः अस्ति, नारीणां केवलं दानकृते वस्तुनि स्वाधिकारः। दृश्यते चेह कपाली प्रभूतस्य धनसम्पदस्य अधिकारी आसीत्, परन्तु तत्र रङ्गिण्याः नाधिकारः। वैद्यं दक्षिणाप्रदानाय सा पितृगृहात् लब्धम् आभरणं विक्रीतुमैच्छत् -

''अन्यथा पितृगृहाल्लब्धम् आभरणं विक्रीयापि भवदीयम् ऋणम् अहं विनेष्ये।''[6]

अद्यापि इदं मन्यते यत् नारीणां प्रकृतं स्थानं गृहे रन्धनशालायाम् । ततो वहिर्गमणं तासां चरित्रेषु दोषाविष्करणं कालिमालेपनञ्च। गृहे पाचनकर्मणि सर्वदा नारीणामेव नियुक्तिः भवेत् इति समाजस्य अलिखितः नियमः। रन्धनागारे पुरुषाणां प्रवेशः अतीव सम्मानहानिकारकः। अत्र प्रकृते नाटके सूत्रधारविदूषकयोः संलापेन पुरुषतान्त्रिकतयाः छाया अतीव सुस्पष्टा -

''सूत्रधारः - भो वयस्य! व्यापृतस्त्वं कस्मिन् कर्मणि ?
(पेपथ्ये) विदूषकः- अद्य खलु कोजागरपर्वदिवसः, कुटुम्बिनी मां न परित्यजति।
सूत्रधारः- किं बन्धने रन्धने वा रक्षितोऽसि ?
(प्रविश्य) विदूषकः - मादृशं पुरुषसिंहं चौरमिवाथवा चाकमिव का संयुन्तुं पारयति?
एतोऽस्म्यातगतः।''[7]

नारीणां कृते अपशब्दप्रयोगः अपि अस्मिन् नाट्ये प्राप्यते। नाटकस्य स्थाने स्थाने कपालिना अपशब्दः व्यवहृतः। यथा रङ्गिणीमुद्दिश्य-

''कपाली - अरे सर्वस्वनाशिनि! पतिद्वेषिणि! वाचं संयच्छ, नोचेत्तव कण्ठरोधं करिष्यामि।''[8]

''कपाली - अयि चूताष्ठिाम्बचिवुके! कुक्कुरीव ललजिह्वा...।''[9]

दासीं मन्थरां प्रति तस्य व्यवहारः अपि अतीव अपमानकरः -

''कपाली - तुष्णीम्भव। अरे दुष्ट पापिष्ठे काकविष्ठे दासि!
मन्थरा - किं वधिरासि? अरे गर्भदासि!''[10]

❖ **व्रतानुष्ठानम्**

प्रस्तुते नाटके कोजागरीपूर्णिमायाः उल्लेखः अस्ति -

**''अद्य खलु कोजागरपर्वदिवसः......।''**[11]

आश्विनमासस्य पूर्णिमातिथिः एव कोजागरीपूर्णिमा। अस्यां तिथौ देव्याः लक्ष्म्याः पूजनं कर्तव्यम् । ततः नारिकेलोदकं चिपिटकं च देवेभ्यः पितृभ्यः च निवेद्य

सपरिवारैः भोजनीयम् ।ये जनाः तस्यां निशायां अक्षक्रीडया रात्रिजागरणं कुर्वन्ति, लक्ष्मी तान् ''को जागर्ति'' इति उक्तवा धनानि प्रददाति।

नष्टचन्द्रपरिहारप्रथा अस्मिन् नाटके प्राप्यते। रङ्गिण्या उक्तम् -

''यदैव दैववशाद् भाद्रे मासि नष्टचन्द्रदर्शनं मे सङ्घटितं तदैवाशङ्कितोऽयं मिथ्याकलङ्कारोपः।''[12]

भाद्रमासस्य चतुर्थ्यां तिथौ उदितः चन्द्रः एव नष्टचन्द्रः। नष्टचन्द्रदर्शने मिथाकलङ्कारोपः भवतीति पौराणिकी प्रसिद्धिः। एकदा कुबेरस्य गृहे आमन्त्रितः गणेशः भोजनादनन्तरं तमसाच्छन्नचक्षुषा कैलासं प्रत्यावर्तयति। चन्द्रालोके सर्पमेकमालोक्य गणेशस्य वाहनः मूषिकः यदा सभ्यं पलायितुम् उद्यतः तदा गणेशः पथि पतितः। एतद् दृष्ट्वा चन्द्रः अहसत् ।तदा गणेशः रूपदर्पोद्धतं चन्द्र शशाप यत् तस्य प्रकाशः अवलुप्तः भवेत् । देवानाम् अनुरोधेन चन्द्र गणेशं निकषा क्षमां प्रार्थयामास। गणेशः कृपापरवशः सन् प्रतिपक्षं चन्द्रस्य कलानां ह्रासवृद्धिं व्यवस्थापितवान् । यतः चतुर्थ्यां तिथौ गणेशस्य सम्मानहानिरभूत्, तस्मात् अस्यां तिथौ चन्द्रस्य दर्शनं मिथ्याकलङ्कजनकं भविष्यति।

### ❖ पौराणिककथायाः प्रभावः

पौराणिककथायाः प्रभावः समाजे परिलक्ष्यते। चतुर्मुखः ब्रह्मा चतुर्भुजः विष्णुः एते देवाः प्रणम्याः। पतिव्रतारमणीनां दृष्टान्तप्रसङ्गे सीतासावित्रीदमयन्तीनाम् उल्लेखः नाट्ये दृश्यते। कपाली रङ्गिणीम् आह -

**''भोः सीतासावित्रीदमयन्तीप्रतिमे!''**[13]

बृहस्पतिः बुद्धेः देवता इति रङ्गिणीमुखात् सहृदयाः ज्ञायन्ते। मरणाद् अनन्तरं मनुष्याः यमसदने स्थानं लभन्ते। तप्तलौहशलाकया क्षतस्थानदाहोद्यतां रङ्गिणीं कपाली यमदूतिका नाम्ना आह्वयति।

### ❖ पारम्परिकसंस्काराः

विंशशतकस्य उत्तरार्धे विरचिते अस्मिन् प्रहसने समाजे प्रचलितानां प्राचीनसंस्काराणां सामान्यः परिचयः प्राप्यते। यद्यपि पाश्चात्यशिक्षायाः प्रभावेन प्राचीनपरम्पाराणां प्रति अश्रद्धा समाजे वर्धिता। अग्रजानां सम्मुखे नारीणाम् अवगुण्ठनग्रहणम्, वसनेन ग्रीवादेशस्य आवृतकरणम् इत्यादयः संस्काराः प्रस्तुते नाट्ये दृश्यन्ते। वैद्यं दृष्ट्वा रङ्गिणी अवगुठनं धारयति -

**''किञ्चिदवगुण्ठनं नाटयित्वा''।**[14]

गृहे आगतानाम् अतिथीनां गुरुजनानाञ्च अभिवादनं सादरं कर्तव्यम् ।तस्मात् दृश्यते कपालिनः चिकित्सार्थं यदा वैद्यः आगच्छति तदा मन्थरा तं मार्गं प्रदर्शयति -

**''ततः प्रविशति मन्थरया दर्शितोमार्गो वैद्यः।''**[15]

मार्गप्रदर्शनम् अतिथिसत्कारस्य अत्यावश्यकम् अङ्गम् ।

❖ **कुसंस्काराः**

समाजे मन्त्रतन्त्रयोः प्रभावः आसीदिति ज्ञायते। तस्मात् तान्त्रिकः समाजे उच्चस्थाने विराजते। तान्त्रिकः जनपदस्य अलङ्कारः इव। रोगप्रशमनाय जनाः तान्त्रिकं प्रति धावति। तस्मात् रङ्गिणी आह -

''एकस्तान्त्रिकः पल्लीमिमामलङ्करोतीति। स च बहुविधरोगाणां प्रतिहर्ता। तं तावदाह्वयामि।''[16]

मन्त्रतन्त्रैः तान्त्रिकः कपालिनः कुक्कुरदंशनजनितं विषं प्रशमितुमुद्यतः अभूत् । तेनोक्तम - ''डाकिनीशाकिनी भूतपिशाचग्रहावेशविषविकारप्रशमनं मे मन्त्रायत्तम् ।''[17]

कुसंस्कारावृतस्य समाजस्य किञ्चित् चित्रमत्र प्राप्यते। शात्रादिविषये जनानामज्ञानता अपि परिलक्ष्यते। तस्मात् तान्त्रिकप्रतिपादितां अलीकं सद्योजातसंहितां प्रति सर्वे श्रद्धाशीलाः आसन् । तान्त्रिकाः वञ्चनाचतुराः आसन् । स्वस्त्ययनकर्मणा तान्त्रिकः कपालिनः दशतोलकपरिमितं सुवर्णम् अपहृतवान् ।

**खाद्याभ्यासः**

अस्मिन् नाटके बङ्गदेशे प्रचलितानां अन्नपानादीनां वर्णना प्राप्यते। गव्यघृतमतीव महार्घ्यमासीत् । तस्मात् चिकित्सार्थं वैद्यः यदा गव्यघृतं पातुमुपदिशति तदा कृपणः कपाली चकितः अभूत् । गोदुग्धेन सह गव्यघृतपानेन कुक्कुरदंशनजनितं विषप्रशमनं भवति -

**''इदानीमेवायं गव्यघृतमुष्णदुग्धेन सह पाययितत्वयः।''**[18]

गव्यघृतापेक्षया वनस्पतिघृतमतीव सुलभं इति मत्वा श्रेष्ठी वनस्पतिघृतस्य स्तुतिं चकार -

**''अद्भुतं द्रव्यमद्भुतं वनस्पतिघृताभिधम् ।**
**न घोषो गौर्नवा घासो गोरसोऽपि न युज्यते।।''**[19]

शर्करया क्षतस्थानात् प्रवाहितस्य रक्तस्य रोधः भवति। तस्मात् तान्त्रिकः कपालिनः क्षतजरुधिरं रोधयितुं शर्करां व्यवहृतवान् । पूजायां व्रतानुष्ठाने चिपिटकभोजनस्य प्रचलनमासीत् । कोजागरीपूर्णिमायां जनाः लक्ष्मीदेव्याः कृपालाभाय नारिकेलमिश्रितं चिपिटकं खादन्ति। विदूषकेन उक्तम् - ''कुटुम्बिन्या बलात्कारेण नारिकेलखडमिश्रचिपिटकचर्वणं कारितोऽस्मि दारिद्र्यदुःखप्रशमनार्थम् ।''20

तथा स्वस्त्ययनकर्मणि तान्त्रिकः चिपिटकचर्वणस्य विधानमददत् । शान्तिकर्मकाले अन्नं गोधूमचूर्णं दुग्धं घृतं फलं मिष्टान्नञ्च न भोक्तव्यम् । अस्मिन् प्रहसने सक्तु-तिन्तिडी-गुड-मरिच-लवण-तैल-कबु-इत्यादीनां खाद्यवस्तूनां वर्णना उपलभ्यते। मादकरुपेण अहिफेनस्य प्रचलनमासीत् ।

### ❖ आधुनिकचिकित्साविद्या

यद्यपि समाजे तन्त्रमन्त्रस्य प्रभावः आसीत् तथापि आधुनिकचिकित्सा-विद्याविषये जनानां धारणा आसीदिति ज्ञायते। कुक्कुरदंशनेन जलातङ्करोगः स्यात्, तस्मात् शीघ्रं विषप्रशमनं कार्य्यम् । गोदुग्धेन सह गव्यघृतपानेन विषनिरामयः भवति। शर्करया रक्तरोधो भवतीति मन्थरा पूर्वादेव जानाति। क्षतस्थानदाहेन क्षतप्रशमनं स्यात् इति तत्त्वम् आधुनिकचिकित्साविज्ञाने अपि व्यवह्रियते। 'एन्टिसेप्टिक्' पर्यायस्य औषधं मूलतः क्षतस्थानं दग्ध्वा तस्य निरामयं करोति।

**उपसंहारः**

बङ्गीयेन आचार्येण श्रीजीवन्यायतीर्थेन अस्मिन् प्रहसने बङ्गदेशस्य तत्कालिकसमाजस्य अतीव सुस्पष्टं चित्रमत्र प्रस्तुतम् । नाटकादस्मात् समाजतत्त्वस्य संस्कृतेः धार्मिकानुष्ठानस्य वारव्रतस्य कुसंस्कारस्य खाद्याभ्यासस्य आर्थिकवैषमयस्य पुराणकथायाः च विषये दर्शकाः ज्ञातुं शक्नुवन्ति। तस्मात् सार्थकमेव भरताचार्येण उक्तम् -

**''त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ।''**[21]

**सन्दर्भाः**

1. सुरेशचन्द्रः बन्द्योपाध्यायः छन्दा चक्रवर्ती च, भरतनाट्यशास्त्र, नवपत्रप्रकाशन, 1982, प्रथमोऽध्यायः, पृ.17
2. ऋता-चट्टोपाध्यायः सौम्यजित्-सेनश्च, श्रीजीव न्यायतीर्थ ओ चिपिटकचर्वणम् संस्कृत बुक डिपो, 2018, पृ. 76
3. तत्रैव, पृ. 69
4. तत्रैव, पृ. 76
5. तत्रैव, पृ. 84
6. तत्रैव, पृ. 74
7. तत्रैव, पृ. 65
8. तत्रैव, पृ. 68
9. तत्रैव, पृ. 80
10. तत्रैव, पृ. 69
11. तत्रैव, पृ. 65
12. तत्रैव, पृ. 68
13. तत्रैव, पृ. 65
14. तत्रैव, पृ. 72
15. तत्रैव, पृ. 72
16. तत्रैव, पृ. 75
17. तत्रैव, पृ. 77

18. तत्रैव, पृ. 73
19. तत्रैव, पृ. 73
20. तत्रैव, पृ. 66
21. सुरेशचन्द्रःबन्द्योपाध्यायः छन्दा चक्रवर्ती च, भरतनाट्यशास्त्र, नवपत्रप्रकाशन, 1982, प्रथमोऽध्यायः, पृ. 17

**सहायकसन्दर्भसूची**


1. आधुनिक संस्कृत साहित्यः छोटगल्प ओ नाटक, ऋता-चट्टोपाध्यायः। प्रग्रेसिभ पावलिशार्स, कालिकाता, 2012
2. पण्डित श्रीजीव न्यायतीर्थेर सारस्वत साधना, ऋता-चट्टोपाध्यायः। संस्कृत पुस्तक भाण्डार, कलिकाता, 2004
3. भट्टपल्लीर मनीषी, कमलाचरण-मुखोपाध्यायः, आण्डारग्राउण्ड साहित्य, हुगली, 2002
4. भरतनाट्यशा, सम्पा. सुरेशचन्द्रः वन्द्योपाध्यायः ओ छन्दा चक्रवर्ती, नवपत्रप्रकाशन, कलिकाता, 1982
5. श्रीजीव न्यायतीर्थ ओ चिपिटकचर्वणम् , ऋता-चट्टोपाध्यायः सौम्यजितसेनश्च। संस्कृत बुक डिपो, कलिकाता, 2018
6. संस्कृत काव्यचर्चाय वाङालीः सेकाल ओ एकाल, अञ्जलिका-मुखोपाध्यायः, संस्कृत पुस्तक भाण्डार, कलिकाता, 2013
7. संस्कृतसाहित्ये पश्चिमङ्गस्यावदानम् , नारायणदशः, कथाभारती, कलिकाता, 2008
8. संस्कृतसाहित्ये वाङालीर दान, सुरेशचन्द्र-वन्दोपाध्यायः, संस्कृत पुस्तक भाण्डार, कलिकाता, 1962

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# गरुड़पुराणे समासचर्चा

**शुभलक्ष्मी आचार्य***

**सारांश -** गरुड़पुराणे षड्विधानां समासानां वर्णना दृश्यते। यथा - 1. कर्मधारयसमासः, 2. द्विगुसमासः, 3. तत्पुरुषसमासः, 4. बहुव्रीहिसमासः, 5. अव्ययीभावसमासः, 6. द्वन्द्वसमासः। तेषां समासानां ससूत्रं सोदाहरणं च चर्चा अत्र शोधपत्रेऽस्मिन् विधीयते।

**कुञ्जीशब्दाः -** गरुड़पुराणम् , तदर्थः, वृकभीतिः, यद्धनम् , समासः, तत्त्वज्ञः, देवर्षिमानवाः।

**उपक्रमः**

पुराणं पञ्चमलक्षणम् अथवा दशलक्षणम् इति सर्वजनविदितमस्ति। परन्तु एतानि लक्षणानि विहाय पुराणेषु अन्येषां केषांचित् गुरुत्वपूर्णविषयाणां चर्चाऽपि दृश्यते। तादृशः एकः विषयोऽस्ति व्याकरणचर्चा। अग्निपुराणे व्याकरणस्य महती चर्चा विलोक्यते। तद्वत् गरुड़पुराणेऽपि व्याकरणचर्चा उपलभ्यते।

तासु समासविषयिणी चर्चा अन्यतमा। अस्मिन् शोधप्रबन्धे गरुड़पुराणस्थितां व्याकरणचर्चामाधारीकृत्य किञ्चित् विवेचनं प्रस्तूयते। गरुड़पुराणस्य मतेन समासः षड्विधः भवति। यथा -

**समासाः षट् समाख्याताः**[1]

तद् यथा - 1. कर्मधारयसमासः, 2. द्विगुसमासः, 3. तत्पुरुषसमासः, 4. बहुव्रीहिसमासः, 5. अव्ययीभावसमासः, 6. द्वन्द्वसमासः।

*अध्यापिका, संस्कृतविभागः, स्वामिविवेकानन्दस्मारकस्वयंशासितमहाविद्यालयः, जगतसिंहपुरम् (ओडिशा)

परन्तु गरुड़पुराणे समासस्य आलोचनप्रसङ्गे किमपि सूत्रम् न उदाहृतम् । केवलं समास्य नाम उदाहरणं च तत्र सूचितमस्ति। यद्यपि तत्र सूत्रस्य उल्लेखः नास्ति तथापि अत्र पाणिनिव्याकरास्य सूत्रैः सह एव तेषां पदानां विवेचनं क्रियते।

1. **कर्मधारयसमासः**

गरुड़पुराणे कर्मधारयसमासस्य उदाहरणरूपेण सद्विजः इति पदस्य उल्लेखः कृतः। यथा -

**स द्विजः कर्मधाररायः**[2]

सद्विज इति पदस्य -

लौकिकविग्रहः - सः द्विजः

अलौकिकविग्रहः - तद् (पुं)+ सु द्विज + सु

अत्र विशेषणं विशेष्येण बहुलम्[3] इति सूत्रेण समासः।

2. **द्विगुसमासः**

गरुड़पुराणे द्विगुसमासस्य उदाहरणरूपेण त्रिवेदीग्राम इति पदस्य उल्लेखः कृतः। यथा -

**द्विगुस्त्रिवेदी ग्रामश्च**[4]

त्रिवेदीग्राम इति पदस्य -

लौकिकविग्रहः - त्रयाणां वेदानां समाहारः

अलौकिकविग्रहः - त्रि + ङस् वेद + ङस्

अत्र *संख्यापूर्वो द्विगुः*[5] इति सूत्रेण समासः।

3. तत्पुरुषसमासः

गरुड़पुराणे तत्पुरुषसमासस्य उदाहरणरूपेण तत्कृतः, तदर्थः, वृकभीतिः, यद्धनम् , ज्ञानदक्षः, इति पदानाम् उल्लेखः कृतः। यथा -

**तृतीयातत्पुरुषसमासः**

गरुड़पुराणे तृतीयातत्पुरुषसमासस्य उदाहरणरूपेण तत्कृतः इति पदस्य उल्लेखः कृतः। यथा -

**अयं तत्पुरुषः स्मृतः**

**तत्कृतश्च तदर्थश्च वृकभीतिश्च यद्धनम्**[6]

तत्कृत इति पदस्य -

लौकिकविग्रहः - तेन कृतः

अलौकिकविग्रहः - तेन + टा कृत + सु

अत्र *तृतीया तत्कृतार्थेन गुणवचनेन*[7] इति सूत्रेण समासः।

**चतुर्थीतत्पुरुषसमासः**

गरुड़पुराणे चतुर्थीतत्पुरुषसमासस्य उदाहरणरूपेण तदर्थः इति पदस्य उल्लेखः कृतः। यथा -

**अयं तत्पुरुष स्मृतः**

**तत्कृतश्च तदर्थश्च वृकभीतिश्च यद्धनम्** [8]

तदर्थ इति पदस्य -

लौकिकविग्रहः - तस्मै अर्थः

अलौकिकविग्रहः - तद् (पुं.) + ङे अर्थ + सु

अत्र *चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः*[9] इति सूत्रेण समासः।

**पञ्चमीतत्पुरुषसमासः**

गरुड़पुराणे पञ्चमीतत्पुरुषसमासस्य उदाहरणरूपेण वृकभीतिः इति पदस्य उल्लेखः कृतः। यथा -

**अयं तत्पुरुषः स्मृतः**

**तत्कृतश्च तदर्थश्च वृकभीतिश्च यद्धनम्** [10]

वृकभीति इति पदस्य -

लौकिकविग्रहः - वृकाद् भीतिः

अलौकिकविग्रहः - वृक + ङसि भीति + सु

अत्र *पञ्चमी भयेन सूत्रस्य प्रसङ्गे प्रदत्तेन भयभीतभीतिभीभिरिति वाच्यम्* [11] इति वार्त्तिकेन समासः।

**षष्ठीतत्पुरुषसमासः**

गरुड़पुराणे षष्ठीतत्पुरुषसमासस्य उदाहरणरूपेण यद्धनम् इति पदस्य उल्लेखः कृतः। यथा -

**अयं तत्पुरुषः स्मृतः**

**तत्कृतश्च तदर्थश्च वृकभीतिश्च यद्धनम्** [12]

यद्धनम् इति पदस्य -

लौकिकविग्रहः - यस्य धनम्

अलौकिकविग्रहः - यत् + ङस् धन + सु

अत्र *षष्ठी*[13] इति सूत्रेण समासः।

**सप्तमीतत्पुरुषसमासः**

गरुड़पुराणे सप्तमीतत्पुरुषमासस्य उदाहरणरूपेण ज्ञानदक्षः इति पदस्य उल्लेखः कृतः। यथा -

**ज्ञानदक्षेण तत्त्वज्ञो बहुब्रीहिरथाव्ययी**[14]

ज्ञानदक्ष इति पदस्य -

लौकिकविग्रहः - ज्ञानेदक्षः

अलौकिकविग्रहः - ज्ञान + ङि दक्ष + सु

अत्र *सप्तमी शोण्डैः* [15] इति सूत्रेण समासः।

**4. बहुव्रीहिसमासः**

गरुड़पुराणे बहुव्रीहिसमासस्य उदाहरणरूपेण तत्वज्ञ इति पदस्य उल्लेखः कृतः। यथा -

**ज्ञानदक्षेण तत्त्वज्ञो बहुब्रीहिरथाव्ययी**[16]

तत्त्वज्ञ इति पदस्य -

लौकिकविग्रहः - तत्त्वं ज्ञानाति यः सः

अलौकिविग्रहः - तत्त्व + अम् ज्ञ + सु

अत्र अनेकमन्यपदार्थे[17] इति सूत्रेण समासः।

**5. अव्ययीभावसमासः**

गरुड़पुराणे अव्ययीभावसमासस्य उदाहरणरूपेण अधिभाव (अधिमान) इति पदस्य उल्लेखः कृतः। यथा -

**ज्ञानदक्षेण तत्त्वज्ञो बहुब्रीहिरथाव्ययी**
**भावेऽधिस्त्रि यथोक्तं**[18]

अधिभाव (अधिमान) इति पदस्य -

लौकिकविग्रहः - भावे इति

अलौकिकविग्रहः - भाव + ङि अधि

अत्र *अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावा - त्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्थानुपूर्व्ययौग - पद्चासादृश्यसम्पत्तिसाकल्यान्तवचनेषु*[19] इति सूत्रेण समासः।

**6. द्वन्द्वसमासः**

गरुड़पुराणे द्वन्द्वसमासस्य उदाहरणरूपेण देवर्षिमानवाः इति पदस्य उल्लेखः कृतः। यथा -

**भावेऽधिस्त्रि यथोक्तं तु द्वन्द्वो देवर्षिमानवाः**[20]

देवर्षिमानवाः इति पदस्य -

लौकिकविग्रहः - देवश्च ऋषिश्च मानवाश्च

अलौकिकविग्रह - देवर्षि + सु मानव + ज्ञस्

अत्र *चार्थे द्वन्द्व*[21] इति सूत्रेण समासः।

**उपसंहारः**

अनेन प्रकारेण गरुड़पुराणे विलोकितायाः व्याकरणचर्चयाः ज्ञायते यत् तत्र प्रदत्तानि सर्वाणि उदाहरणानि पाणिनिव्याकरणसम्मतानि। अतः गरुड़पुराणस्य अनया समासचर्चाया समाधान्ययनस्य मार्गः अधिकप्रशस्तः स्यात् ।

**सन्दर्भाः**

1. गरुड़पुराणम् , 1.204.11
2. तत्रैव, 1.204.11
3. अष्टाध्यायी, 2.1.57
4. गरुड़पुराणम् , 1.204.11
5. अष्टाध्यायी, 2.1.52
6. गरुड़पुराणम् , 1.204.11-12
7. अष्टाध्यायी, 2.1.30
8. गरुड़पुराणम, 1.204.11-12
9. अष्टाध्यायी, 2.1.36
10. गरुड़पुराणम् , 1.204.11-12
11. अष्टाध्यायी, 2.1.37 (वार्त्तिकम्-1275)
12. गरुड़पुराणम् , 1.204.11-12
13. अष्टाध्यायी 2.2.8
14. गरुड़पुराणम् , 1.204.12
15. अष्टाध्यायी, 2.1.40
16. गरुड़पुराणम्, 1.204.12
17. अष्टाध्याय, 2.2.24
18. गरुड़पुराणम् , 1.204.13
19. अष्टाध्यायी, 2.1.6
20. गरुड़पुराणम् , 1.204.13
21. अष्टाध्यायी, 2.2.29

**सन्दर्भग्रन्थसूचीः**

1. गरुडपुराणः एकः अध्ययनम् , अवस्थी, अवधबिहारी लाल, चौखम्बा संस्कृतप्रतिष्ठानः, दिल्ली, 1995
2. संक्षिप्त गरुडपुराण, गीताप्रेस, गोरखपुर, 2000
3. गरुडपुराणम् , भट्टाचार्य, रामशङ्कर, चौखम्बा संस्थान वाराणसी, 1998
4. पुराणविमर्शः, उपाध्याय, बलदेव, चौखम्बा विद्याभवन, वाराणसी, 2009

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# रघुवंशमहाकाव्ये धर्मरूपपुरुषार्थविचारः

**प्रियंका बारीक***

**सारांशः -** रघुवंशमहाकाव्ये प्रथमसर्गे राजा दिलीपः सन्तानसिद्धिप्रकारम् अभावे हेतुं च प्रष्टुं सत्पनीको वशिष्ठाश्रमं जगाम। सः चिरं वशिष्ठाय स्वबाधां निवेद्य पितृणात् मां मोचयितुमर्हसीति मुनिं प्रार्थयामास।

इक्ष्वाकवः सूर्यवंश्याः वैवश्वतमनुमारभ्य प्रवृत्तः इक्ष्वाकुवंशो दिलीपावधि वंशानुक्रमणिः। इदानीमैक्ष्वाकस्य दिलीपस्य सन्तत्यभावात् वंशच्छेदः शङ्कितः। दिलीपात्प्राक् बहवो राजानः वशिष्टमाराध्य सगरादीन् पुत्रान् प्राप्तवन्तः। अत इक्ष्वाकुवंशकथनसाम्येन ऐकक्ष्वाकस्य दिलीपस्य विशेषभूतस्य अर्थसिद्धिः समर्थ्यते। अत्र सन्तानार्थित्वस्य काम्यविषयत्वमिति स्वदारेषु एव मुनेः अनुग्रहादेव दिलीपः सन्तानलिप्सुः इति काम्येऽपि धर्म एव अनुश्रुयते। तत्र रघुवंशमहाकाव्ये वर्णितेषु धर्मार्थकाममोक्ष पुरुषार्थेषु धर्मपुरुषार्थ आश्रित्य अत्र विचारः प्रस्तुतः विद्यते।

**कुञ्जीशब्दाः -** कालिदासः, रघुवंशम् , पुरुषार्थः, महाकाव्यम् , महाकविः, उज्जयिनी, महाभारतम् ।

## भूमिका

संस्कृतसाहित्यजिज्ञासुभिः प्रायशः पञ्चकाव्यानि समग्रतया पठ्यन्ते पाठ्यन्ते च। येषां पञ्चमहाकाव्यानीति प्रसिद्धिः जाता। तानि च कालिदासकाव्यत्रयं रघुवंशम् , कुमारसम्भवम् , मेघदूतं चेति। माघकवेः शिशुपालवधम् , भारवेः किरातार्जुनीयम् इति पञ्च महाकाव्यानि। केचित्तु मेघदूतं विहाय श्रीहर्षस्य नैषधीयचरितं गणयन्ति।

*शोधच्छात्रः, संस्कृत विभाग, जादवपुर विश्वविद्यालय

एवं पञ्चस्वपि त्रीणि काव्यानि कालिदासस्यैव। कालिदासः इति कवेः स्वचरितार्जितं नाम स्यात् । न केवलयदृच्छाशब्दः। उज्जयिनीपुर्यां महकालीमाराध्य इमां कवित्वसम्पदं लब्धवानिति कथापि प्रसिद्धा। जन्मतस्त्वयं यथाजातः। राज्ञः पुत्रीं परिणीय तयाऽक्षिप्तः कालीदासो भूत्वा काल्यैवानुगृहीत इति कथापि श्रूयते। विदुष्या भार्यया प्रथमम् 'अस्ति कश्चिद् वाग्विशेषः' इति पृष्टे सति तमेव प्रश्नमाधारीकृत्य मङ्गलाचरणपद्येषु तान्येव पदानि निधाय काव्यत्रयं निर्मितवान् इति कथापि प्रसिद्धा।

काल्याः दासः कालीदास इति षष्ठीसमासे 'ङ्यापोः संज्ञा छन्दसोः बहुलम्'[1] इति सूत्रेण ह्रस्वे कालिदासः इति रूपम् । अतस्त्वयं यौगिकरूढः शब्दः। कालिदासकृतानि षट् काव्यानि प्रसिद्धानि सप्तमं ऋतुसंहारमपि कालिदासकृतमिति केषाञ्चित् मतम् ।

**रघुवंशम्**

रघुवंशममहाकाव्यम् ऊनविंशति सर्गात्मकं महाकाव्यम् । अत्यन्तपराक्रमी सर्वसद्गुणसम्पन्नः रघुरेव काव्यनायकः। यद्यपि सार्धचतुर्थसर्गपर्यन्तमेव काव्ये रघोः कथा दृश्यते। तथापि कुशपर्यन्तं सर्वेषु राजसु रघोरधिगता उदात्ता गुणा वर्णिता इति रघोरेव नायकत्वं काव्यस्य सिद्धम् । धर्मवीरः प्रधानो रसः अष्टादशवर्णनेषु यथावसरं केषाञ्चन वर्णनमत्र काव्ये निबद्धम् ।

**कुमारसम्भवम्**

कुमारसम्भवमहाकाव्यं सप्तदशसर्गात्मकमुपलभ्यते। किन्त्वष्टावेव सर्गाः कालिदासरचिता इति विदुषां मतम् । मल्लिनाथोऽपि अष्टमसर्गान्तं कुमारसम्भवं व्याख्याय व्याख्यान्ते व्याख्यासमापकं मङ्गलाचरणमपि प्रायशो ग्रन्थसमाप्तावेव एतादृशः उपसंहारः सर्वासु व्याख्यासु दृश्यते।

**अभिज्ञानशाकुन्तलम्**

महाभारते आदिपर्वाणि वर्तमानां कथामाधारीकृत्य नाटकमिदं रचितम् । पद्मपुराणे स्वर्गखण्डे प्रथमेषु पञ्चस्वध्यायेषु कालिदासनाटककथायाः सदृशीकथा यद्यप्युपलभ्यते तथापि पद्मपुराणस्य कालो नाद्यावधि निश्चितः। महाभारतानुसारेण कथा एवंभूता। चन्द्रवंश्योत्पन्नो दुष्यन्तो मृगयार्थी कदाचित् कण्वाश्रमोपान्तमागत्य तत्र शकुन्तलां दृष्ट्वा तां चकमे। चन्द्रवंश्योत्पन्नो दुष्यन्तो मृगयार्थी कदाचित् कण्वाश्रमोपान्तमागत्य तत्र शकुन्तलां दृष्ट्वा तां चकमे। शकुन्तला विश्वामिमेनकायां जाता, कण्वेन पालिता च। राज्ञः आगमनसमये कण्वः फलादीन्याहर्तुं वनं गतः। राजापि कालातिपातमसहमानस्तदैव गान्धर्वेण विधिना तामुपयेमे। 'मयि जातः पुत्रः तदनन्तरं राजा भवेत' इति शकुन्तलया चोदितः तथेति प्रतिज्ञाय तया सङ्गतवान् । तदानीमेव राजधानीं प्रतिनिवृत्तः पञ्चदशवर्षाणि तस्याः स्मरणमपि न कृतवान। कण्वः सपुत्रां तां दुष्यान्तान्तिकं

प्रेषयामास। राजा तां जानन्नपि नजानामीति तिरश्चकार। आकाशवाण्या चोदितस्तां स्वीचकार। एवं महाभारतकथायां नायकस्य धीरोदात्तताहानिं वारयितुं कविस्तत्र परिवृत्तिमकरोत् ।

**मालविकाग्निमित्रम्**

लघुकायेऽस्मिन्नाटके विदर्भराजदुहितुर्मालविकायाः मालवेन्द्रेण सह प्रणयस्य कथा मनोहरया शैल्योपनिबद्धा। नाट्यकलाप्रदर्शनाय रङ्गमवतीर्णाया मालविकाया वर्णने कविना नाट्यशास्त्ररहस्यज्ञानमपि प्रकटीकृतम् । इदं नाटकं कालिदासस्याद्या कृतिरिति ग्रन्थान्तरवदत्र प्रौढिर्नावाप्यते।[2]

**विक्रमोर्वशीयम्**

कुबेरमाराध्य प्रतिनिवृत्तोर्वशी मध्येमार्गं केशिनाम्ना राक्षसेन बलादाह्रियमाणा श्रुतरमणीरुदितोपस्थितेन राज्ञा पुरूरवसा राक्षसत्रासान्मोचयित्वा स्वरथेऽवस्ताप्याप्स-रोनिकेतं नीयमाना जातप्रबोधमात्रैव तस्मिनासक्तिमभजेति कथाबीजम् । त्रिष्वपि रूपकेषु कालिदासेन स्वीयपाण्डित्यप्रकर्षो दर्शितः।[3]

**मेघदूतम्**

खण्डकाव्यप्रक्रियायां सन्देशकाव्येषु सर्वप्रथममेतत् काव्यम्। अस्मिन् काव्ये सर्गद्वये प्रथमसर्गे त्रिषष्टिः द्वितीये द्विपञ्चाशत् श्लोकाः वर्तन्ते। प्रथमसर्गस्य पूर्वमेघ इति द्वितीयसर्गस्य उत्तरमेघ इत व्यवहारः।

**ऋतुसंहारकाव्यम्**

अत्र काव्ये लघुकायाः षट् सर्गाः सन्ति यत्र संहत्य 153 श्लोकाः षड्तुवर्णने निबद्धाः। प्रकृतेः सर्वावस्थासु परिवर्तितानि तानि तानि चित्राण्यत्र प्रस्तुतानि यानि प्रत्यक्षदृष्टानीव हृदयं रञ्जयन्ति। कालिदासीयमेवेदमपि काव्यम् ।

**रघुवंशे धर्मविषयकपुरुषार्थविचारः**

सम्प्रति कालिदासकृतिषु धर्मविषयकपुरुषार्थसमीक्षा अनेकप्रकारकलोक-हितोक्तिरूपेण कर्तुं शक्यते।

**तस्मान्मुच्यते यथा तात संविधातुं तथाऽर्हसि।**
**इक्ष्वाकूणां दूरापेऽर्थे त्वदधीनाहि सिद्धयः॥[4]**

रघुवंशमहाकाव्ये प्रथमसर्गे राजा दिलीपः सन्तानसिद्धिप्रकारम् अभावे हेतुं च प्रष्टुं सत्पनीको वशिष्ठाश्रमं जगाम। सः चिरं वशिष्ठाय स्वबाधां निवेद्य पितृणात् मां मोचयितुमर्हसीति मुनिं प्रार्थयामास।

इक्ष्वाकवः सूर्यवंश्याः वैवश्वतमनुमारभ्य प्रवृत्तः इक्ष्वाकुवंशो दिलीपावधि वंशानुक्रमणिः। इदानीमैक्ष्वाकस्य दिलीपस्य सन्तत्यभावात् वंशच्छेदः शङ्कितः। दिलीपात्प्राक् बहवो राजानः वशिष्टमाराध्य सगरादीन् पुत्रान् प्राप्तवन्तः। अत

इक्ष्वाकुवंशकथनसाम्येन ऐकक्ष्वाकस्य दिलीपस्य विशेषभूतस्य अर्थसिद्धिः समर्थ्यते। अत्र सन्तानार्थित्वस्य काम्यविषयत्वमिति स्वदारेषु एव मुनेः अनुग्रहादेव दिलीपः सन्तानलिप्सुः इति काम्येऽपि धर्म एव अनुश्रुयते।

**अवजानासि मां यस्मादतस्ते न भविष्यति।**

**मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा।।**[5]

शापः दिग्गजघोषणे गङ्गा प्रवाहध्वनिना च त्वया सारथिना वा न श्रुतः। अतस्तवसन्तानकामरूपमीप्सितं स प्रतिबन्धकम् । पूज्यानां पूज्याव्यतिक्रमः श्रेयसः प्रतिबन्धको भवति। अत्र श्रेयस्सामान्यस्य वृत्तान्तेन विशेषस्य सुरभि पूज्याव्यतिक्रमस्य विशेषस्य प्रतिबन्धकत्ववर्णनं दृश्यते। अत्र पूज्यवस्तुनः व्यतिक्रमात् दिलीपः शप्तः। प्रशस्तमाङ्गल्यं देवतायतनचतुष्पदं प्रदक्षणमावर्तयत इत्यादि धर्मः दिलीपेन न पालितः अतः सर्वधा धर्मविषकत्वात् धर्मपुरुषार्थः विवेचितः।

**व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः।**

**न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः।।**[6]

अत्र दिलीपेन स्वरक्षारूपः धर्मः अतिक्रान्तः इत्याशङ्कया कविः सर्व बलनिवर्तनेऽपि दिलीपः आत्मरक्षां कर्तुं समर्थः इति विषयं मनुवंश्यसामान्यवृत्तान्तेन समर्थयतीति। 'सर्वत एवात्मानं गोपयेत्' इति धर्मः अत्र सूचितः।

**स त्वं निवर्तस्व विहायलज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः।**

**शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति।।**[7]

अत्र ब्राह्मणार्थे गवाम् अर्थे वीरेण प्राणत्यागः सर्वदा प्रशंसनीयोऽपि आपद्धर्मरूपेण स्वशक्तेः शस्त्रेण च यदि तदसाध्यं तदा न दोषः इति आपद्धर्मः अत्र सूचितः।

**गवामर्थे ब्राह्मणार्थे स्वाम्यर्थे स्वीकृतेऽथवा।**

**स्थानार्थे यस्त्यजेत्प्राणांस्तस्य लोकाः सनातनाः।।**[8]

इति धर्मस्तु शक्यविषयक एव इति सिंहवाक्यादिप्रायत्वात् धर्मविषयकः अयं श्लोकः।

**तदङ्गमग्र्यं मघवन्महाक्रतोरमुं तुरङ्गप्रतिमोक्तुमर्हसि।**

**पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददत्ते न पद्धतिम् ।।**[9]

रघुर्यज्ञविघ्नकरणे प्रवृत्तमिन्द्रं तस्मादेवं वारयित्वा सर्वात्मना यज्ञो रक्षणीयः। स्वयं रक्षितव्यं यज्ञाश्वं हरसीति स्वधर्मात् च्युतोऽसि। अतोऽश्वं मुञ्च। निष्कलङ्कस्य मार्गस्य प्रभुर्निर्देशको भवति। प्रभुः स्वयमयशस्करं मार्गं नानुसरति। अत्र प्रतिषेधमुखेन इन्द्रप्रवृत्ते निषेधेन यज्ञविधिसमापनमेव समर्थित एव धर्मविषयकः अयम् ।

**अपनीत शिरस्त्राणाः शेषास्तं शरणं ययुः।**
**प्रणिपात प्रतीकारः संरम्भो हि महात्मनाम् ।।**[10]

रघुदिग्विजयप्रसङ्गे पारशीकाः रघुणा पराजिताः। तेषु हतशेषा रघुं प्रणिपत्य शिरस्त्राणात् तस्य पादेऽप्रयित्वा शरणं ययुः। तांश्च रघुः प्राणैरनुगृहीतवान् । महतां कोपो नमस्कारेण विनयेन चापनेतुं शक्यो भवति। अत्र महात्मनां धर्मेण रघोरपि क्षमा धर्मः समर्थितः इति धर्मपुरुषार्थविषयः प्रतिपादितः।

**तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता।**
**वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः।।**[11]

अत्र वशिष्ठसन्देशे शोकविदुरेण त्वया प्रजापालने उपेक्षा न कार्या इति धर्म बोधनात् राजधर्म ज्ञापनाच्च धर्म पुरुषार्थः प्रतिपादयति।

**यौवनोन्नति विलासिनीस्तन क्षोभलोलकमलाश्च दीर्घिकाः।**
**गूढमोहनगृहास्तदम्बुभिः स व्यगाहत विगाढमन्मथः।।**[12]

अत्र सत्वरजस्तमोगुणानां प्रकृतिजत्वेऽपि सत्वगुणस्य सन्मार्गवर्तनं, केवलं रजोगुणपूर्णस्य कामवृत्तं, तमसपूर्णस्य सर्वधा नाराश्च भवति। विद्वांसः सत्वगुणस्य महिमानं जानन्तः अपि कदाचित् रजसः आधिक्येन अमार्गप्रवृत्ताः भवन्ति। दशरथः अपि एवम् अभूदिति वृत्तान्तेन राजसेनपथस्तदापि न गन्तव्यमित्युपदेशः धर्मप्रबोधः।

**उपसंहारः**

संस्कृतसाहित्यपरम्परायां महाकविः कालिदासः लब्धप्रतिष्ठः महाकविः। तस्मादेव संस्कृतसाहित्ये समेषां मनःसु कालिदासस्य नाम सुविदितमेव। कविना प्रदर्शितः मार्गः बहुभिः अनुसृतः इत्यत्रास्ति बहुप्रमाणम् । तद्विरचितेषु महाकाव्येषु बहुविधं वैशिष्ट्यं परिलक्ष्यते। अत्र रघुवंशमहाकाव्ये धर्मरूपपुरुषार्थविचारः एव केवलं कृतः इति शम् ।

**सन्दर्भाः**

1. अष्टाध्यायी 6-3-63
2. संस्कृतसाहित्येतिहासः, पृ. 101
3. तदेव
4. रघुवंशम् 1/72
5. तदेव 1/77
6. तदेव 2/4
7. तदेव 2/40
8. पञ्चतन्त्रम् -मित्रभेदः, पृ. 871
9. रघुवंशम् 3/46
10. तदेव 4/64
11. तदेव 8/83
12. तदेव 19/9

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# नाट्यशास्त्रस्य अनुसरणं दशविध-रूपकेषु

**ज्योतिष्मयी वि.*, डॉ. श्रीपाद् हेच् घलिगि****

**सारांशः -** अभिनयस्य विषये विश्वस्मिन् अत्यन्तं प्राचीनतमः एवम् आधिकारिश्च ग्रन्थः नाट्यशास्त्रं भवति। भरतमुनिना विरचिते अस्मिन् ग्रन्थे अभिनवस्य सविस्तरमध्ययनं वर्तते। रूपकादीनां विविधानां प्रभेदानां विषये प्रथमतया अत्रैव उल्लेखः कृतः इति विदुषां मतम् । दशविधरूपकाणां विषये, तेषां भेदाः, वैशिष्ट्यं हत्यादयः अत्र विस्तरेण उल्लिखिताः। तत्पश्चात्कालीनाः कवयः एतस्य ग्रन्थस्य साहाय्येन एव विविधप्रकारकाणि रूपकाणि रचितवन्तः इति पण्डितानामभिप्रायः वर्तते। कथं नाट्यशास्त्रस्य अनुसरणं कृत्वा रूपकाणामाविर्भावः इति प्रसिद्धैः कविभिः विरचितानां दशविधरूपकारणामुदाहरणेन अत्र विशकलनं करोति ।

**कुञ्जीशब्दाः -** नाट्यशास्त्रम्, भरतमुनिः, दशरूपकाणि, नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, अङ्कः, ईहामृगः, वीथिः, नाट्यशास्त्रम् ।

**प्रस्तावना**

**भवन्दिः शुचिभिर्भूत्वा तथावहितमानसैः।**
**श्रूयतां नाट्यवेदस्य संभवो ब्रह्मनिर्म्मितः॥**[1]

भरतीयकलानाम् आविर्भावे विकासे च भरतमुनिना विरचितस्य नाट्यशास्त्रनामकस्य ग्रन्थस्य स्थानम् अद्वितीयम् इति परिगण्यते। विश्वस्मिन् ईदृशमेकं ग्रन्थान्तरमन्यत्र द्रष्टुं न पारयामः।

दृश्यकलानां विशेषतया गभीरं तलस्पर्शि चाध्ययनं भरतमुनिना अत्र क्रियते। नाट्य-नृत्ताभिनय-रस-भावानां विषये समग्रम् आधिकारिकञ्च विवरणं तेनात्र क्रियते।

*शोधच्छात्रः अमृतविश्वविद्यापीठम्, कोच्ची परिसरः, केरलम्
**सहाचार्यः अमृतदर्शनम् , अमृतविश्वविद्यापीठम्, कोयम्बत्तूर, तमिल्नाडु

रूपकसङ्केतमपि महत्त्वपूर्णमिति मत्वा तत् दशधा विभज्य तत्रापि विशेषप्रकारेण स्पष्टीक्रियते। नाट्यशास्त्रस्य विंशतितमे अध्याये रूपकाणां दशप्रभेदानां विषये प्रतिपादितम् ।

**नाटकं प्रकरणं भाणः प्रहसनं डिमः व्यायोगः समवकारः अङ्कः**
**ईहामृगः वीथिः इत्येतान्येव दशरूपकाणि इति प्रसिद्धानि।**

तत्पश्चात् आगतानां कवीनां रचनायै नाट्यशास्त्रमिदं देहलीदीपप्रभां प्रायच्छत् । तदनन्तरकाले विख्याताः कालिदास-भास-भवभूति-शूद्रक-श्रीहर्ष-वत्सराज-भट्टनारायणप्रभृतयः कवयः भरतमुनिप्रोक्तान् नियमाननुसृत्य एव स्वीकृतीः रचयामासुः। तेषां कृतयः संस्कृतसाहित्यस्य ख्यातिप्रसारेण भागभाजो भूत्वा साहित्यनभोमण्डले सुतरां शोभन्ते। कालिदासविरचितम् अभिज्ञानशाकुन्तलमेकमेवालम् अस्य वाक्यस्य साधूकरणाय।

**वर्तयिष्यामहं विप्रा दशरूपविकल्पनम् ।**
**नामतः कर्मतश्चैव तथा चैव प्रयोगतः।।**[2]

इति विंशतितमे अध्याये आदौ कथायित्वा आचार्यः रूपकप्रभेदानां विषये इत्थं स्पष्टीकरोति।

**नाटकं सप्रकरणमङ्को व्यायोग एव च**
**भाणः समवकारश्च वीथी प्रहसनं डिमः।**
**ईहामृगश्च विज्ञेयो दशमो नाट्यलक्षणे**
**एतेषां लक्षणमहं व्यख्यास्याम्यानुपूर्वशः।।**[3]

**विषयप्रवर्त्तनम्**

संस्कृते प्रसिद्धानि रूपकाणि तेषां कवयः च कथं नाट्यशास्त्रनियमाननुसृत्य चिरप्रतिष्ठाः सञ्जाताः इति विमर्शः अधुना अत्र क्रियते।

**कालिदासस्य अभिज्ञानशाकुन्तलम्**

अयं ग्रन्थो नाटकप्रभेदे अन्तर्भवति।

नाट्यशास्त्रस्य विंशतितमे अध्याये उल्लिखितान् नियमानुसृत्य एव अस्य नाटकस्य रचना कालिदासेन विहिता।

**प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकं चैव**
**राजर्षिवंशचरितं तथैव दिव्याश्रयोपेतम् ।**
**नानाविभूतिभिर्युतमृद्धि विलासादिभिर्गुणैश्चैव**
**अङ्क प्रवेशकाठयम् भवति हि तन्नाटकं नाम।।**[4]

नाटकविषये भरतमुनेः मतानुसारं प्रख्यातकथा भवेत् । तथा च श‍ृङ्गार-वीर-

करुणादयो रसाः एव प्रधानरसत्वेन भवेयुः। शाकुन्तले शृङ्गाररसस्य प्रामुख्यं भवति चेदपि वेणीसंहारनाटके वीरसस्य तथा उत्तररामचरिते करुणरसस्य प्राधान्यं भवतीत्यपि अवगन्तुं शक्नुमः।

अङ्कानां सङ्ख्या पञ्चतो दशपरिमिता भवितुमर्हति। कालिदासस्तु शाकुन्तले सप्ताङ्कान् सन्निवेशितवान् । प्रख्यातकथावस्तु निमित्तम् महाभारताधारिताम् उपकथां प्रायुङ्क्त कविकुलगुरुः।

**शूद्रकस्य मृच्छकटिकम्**

आचार्यमतानुसारं प्रकरणं नाटकञ्च सर्ववृत्तिविनिष्पन्नं नानाबन्धाश्रयञ्च भवति।

**यत्र कविरात्मशक्त्या वस्तुशरीरञ्च नायकं चैव ।**
**औत्पत्तिकं प्रकुरुते प्रकरणमिति तत्बुधैर्ज्ञेयम् ।।**[5]

रूपकसाहित्ये प्रकरणाप्रभेदे अन्तर्भवति शूद्रकेन विरचितं मृच्छकटिकम् । नाट्यशास्त्रकारस्य मतानुसारं कथावस्तु कविकल्पितं भवेत् । महाराजो वा राजकुमारो वा नायको न भवितुमर्हति। धीरप्रशान्तो नायकः एव भवेदत्र। नायिकात्वेन काचिदेका भवेत् । अभिसारिका अपि प्रकरणे नायिका भवितुं योग्या एव। अत्र मृच्छकटिके चारुदत्ताख्यो ब्राह्मणवणिगेव नायकः अपि च वसन्तसेनाभिधा गणिकैव नायिका भवति। भरतमुनिना यथा प्रोक्तम् तथैवास्मिन् प्रकरणे अङ्कानां सङ्ख्या दश एव विद्यन्ते।

**प्रकरणनाटकविषये पञ्चाद्या दशपरा भवन्त्यङ्काः**
**अङ्कान्तरसन्धिषु च प्रवेशकास्तेषु तावन्तः।।**[6]

**श्यामिलकस्य पादताडितकम्**

**आत्मानुभूतशंसी परसंश्रयवर्णनाविशेषस्तु**
**विविधाश्रयो हि भाणो विज्ञेयस्त्वेकहार्यश्च।।**[7]

भाणाख्ये रूपकप्रकारे अन्तर्भवति इयं कृतिः। वीरस्यः वा शृङ्गारस्यः वा हास्यरसः वा अङ्गिरसरूपेण भेवदिति आचार्यमतम् । सङ्गीतं नृत्यं च भवितुमर्हति चेदपि सर्वमपि एकाङ्गाभिनयरूपेण अस्मिन् प्रकारे भवति। आकाशभाषितानि अत्र अधिकप्रमाणेन दृष्टुं शक्नुमः। धूर्तानां कथा हास्यरूपेण आधिक्येन अत्र वर्ण्यते। तदनुसारं पादताडिका इत्यस्मिन् भाणे कविकल्पिता कथा एव उपयुक्ता भवति। कस्यचित् नगरस्य कथा अस्मिन् प्रमुखतया कथ्यते। अस्मिन् नायकः विटः हास्यरूपेण नगरे विद्यमानानां धूर्तानां चेष्टाः वर्णयति।

**महेन्द्रवर्मणः मत्तविलासप्रहसन्**

**प्रहसनमपि विज्ञेयं द्विविधं शुद्धं तथा च सङ्कीर्णम्**
**वक्ष्यामि तयोरुक्त्या पृथक् पृथग्लक्षणविशेषम् ।।**[8]

प्रहसनप्रभेदस्य उदाहृतिरयं ग्रन्थः भरतनियमानुसारमेव प्रणीतो वर्तते। अस्मिन् प्रभेदे एक एव अङ्को भवति। अपि च हास्यपुरुषः उत निन्दनीयः पुरुषोऽस्य नायको भवति। हास्यमेव अस्य प्रकारस्य प्रधानरसो भवेत् । अस्मिन् प्रहसने अपि कविकल्पित-कथावस्तु एव महेन्द्रवर्माणा प्रयुक्तम् ।

अस्मिन् प्रहसने कापालिकभिक्षुकस्य सत्यसोमस्य तस्य पत्न्याः देवसोमायाः च मदिरापानविलासद्वारा तथा च प्रच्युतस्य कपालभिक्षापात्रस्य अन्वेषणद्वारा च हास्यसम्भाषणैः कासाञ्चन रूढमलपद्धतीनां विमर्शोऽपि क्रियते। बुद्धभिक्षोः वनानि अपि पुनर्विचिन्तनाय अवकाशं कल्पयन्ति।

**वत्सराजस्य त्रिपुरविजयम्**

**प्रख्यातवस्तुविषयः प्रख्यात्योदात्तनायकश्चैव**

**षड् रसलक्षणयुक्तश्चतुरङ्को वै डिमः कार्यः।।**[9]

डिमाख्यस्य रूपकप्रभेदस्य विवरणे प्रख्याता पुराणेतिहासादिकथा एव कथावस्तु भवेदिति निर्दिष्टं मुनिना। चतुर्भिरङ्कैरुपेते अस्मिन् प्रभेदे अमानुषिकपात्राणां संभवान् समावेशयितुं शक्यते। देवाः यक्षाः किन्नराः गन्धर्वाः इत्येवं षोडशविधाः नायकाः भवितुमर्हन्ति इति निर्दिष्टम् । मुख्यो रसः तु हास्यशृङ्गारौ विहाय कश्चिदन्यो भवितुमर्हति। रौद्रस्येव अधिकप्रमाणेन उपयोगोऽत्र दृश्यते। मायामहेन्द्रजालादयो विषयाः अत्र अन्तर्भवन्ति।

**विश्वनाथस्य सौगन्धिकहरणम्**

**व्यायोगस्तु विधिज्ञैः कार्यः प्रख्यातनायकशरीरः**

**अल्पस्त्रीजनयुक्त स्त्वेकाहकृतस्तथा चैवः।**[10]

रूपकविधौ व्यायोगप्रकारे अन्तर्भूतानां नियमानामनुसारेण इतिहासप्रसिद्धमितिवृत्तम् अत्र भवति। अस्मिन् युद्धदृश्यं भवितुं शक्नोति चेदपि परं तत्र स्त्रीहेतुनोत्पन्नं स्यात् । भरतोक्तो धीरोदात्तः नायकः एव सौगन्धिकहरणे वर्तते। नियमानुसारं एकाङ्कयुक्तेऽस्मिन् व्यायोगे स्त्रीणामपेक्षया पुरुषपात्राणामाधिक्यं दृष्टुं पारयामः। शृङ्गारहास्यौ वर्जयित्वा इतरे रसाः समावेशनीयाः इत्याचार्यमतानुसारं वीररौद्रादीनामुपयोगोऽत्र आधिक्येन दृश्यते।

**वत्सराजस्य समुद्रमन्थनम्**

**देवासुरबीजकृतः प्रख्यातोदात्तनायकश्चैव।**

**त्र्यङ्कस्तथा त्रिकपटस्त्रिविद्रवः स्यात् त्रिशृङ्गारः**

**द्वादशनायकबहुलो ह्यष्टादश नाडिका प्रमाणश्च।।**[11]

समवकारप्रभेदे निर्दिष्टनियमानुसारं त्रयः अङ्काः अत्र विद्यन्ते।

इतिहासपुराणादिप्रसिद्धकथावस्तु एव अत्रापि इतिवृत्तत्वेन वर्तते। अयं समवकारः अपि वीररसप्रधानो भवति। शृङ्गाररसस्य हास्यस्य च उपयोगः अत्र न भवत्येव। देव-मानवसंबद्धाः द्वादशप्रकारकाः नायकाः समवकारे भवितुमर्हन्ति। नाट्यशास्त्रनियमानुसारं गायत्री-उष्णिक् प्रभृतीनां छन्दसामुपयोगोऽपि काव्येऽस्मिन् वत्सराजेन भूरिशः कृतो वर्तते।

**भास्करस्य उन्मत्तराघवम्**

**प्रख्यात वस्तुविषयस्त्वप्रख्यातः कदाचिदेव स्यात्**
**दिव्यपुरुषैर्वियुक्तः शेषैर्युक्तो भवेत् पुंभिः॥**[12]

इति अङ्कस्य वैशिष्ट्यं भरतमुनिः प्रकटयति।

दशरूपकेषु अङ्काख्ये प्रभेदे अन्तर्भवति भास्करविरचितम् उन्मत्तराघवम् । भरतमुनिना निर्दिष्टानाम् अङ्कनियमानामनुसरणम् अत्र भास्करेण क्रियते। अत्रापि एक एवाङ्को भवति। इतिहासप्रसिद्धं कथावस्तु चेदपि नायकः सामान्यः भवित। करुणरसप्रधानेऽस्मिन् प्रभेदे विलापोऽपि भवत्येव। तत्रापि स्त्रीविलापस्य आधिक्यं भवितुमर्हति। वियोगः मरणम् इत्यादयोऽप्यत्र अन्तर्भवति।

**वत्सराजस्य रुक्मिणीहरणम्**

**दिव्यपुरुषाश्रयकृतो दिव्यस्त्रीकारणोपगतयुद्धः**
**सुविहितवस्तुनिबन्धो विप्रत्यय कारकश्चैव**
**उद्धतपुरुषप्रायः स्त्रीरोषग्रथितकाव्यबन्धश्च**
**संक्षोभ विद्रवकृतः सम्फेटकृतस्तथाश्चैव**
**ईहामृगस्तु कार्यः सुसमाहितकाव्यबन्धश्च॥**[13]

नाट्यशास्त्रे भरतमुनिना निर्दिष्ट ईहामृगप्रभेदे विद्यामानान् नियमाननुसृत्यैव वत्सराजेण रुक्मिणीहरणस्य रचना कृता भवति। अस्मिन् चत्वारः अङ्काः वर्तन्ते। देवाः नायकत्वेन वर्तमानेऽस्मिन् षड्प्रकारकाः भवन्ति। इतिहासादिप्रसिद्धा उत कविकल्पिता कथा अत्र स्वीकर्तुं शक्या। शृङ्गारादिरसानां प्रामुख्यमत्र अनुभूयते। वीर-रौद्ररसयोरपि उपयोगोऽत्र भवत्येव। नायिकाहेतुकलहानां दर्शनमपि अस्य वैशिष्ट्यं भवति। युद्धादिकं निवारयितुमत्र नायिकायाः बलात्कारेण नयनं संभवति।

**रविपतेः प्रेमाभिरामम्**

**वीथी स्यादेकाङ्का तथैकहार्या द्विहार्या वा**
**अधमोत्तममध्याभिर्युक्ता स्यात् प्रकृतिभिस्तिसृभिः॥**[14]

सामान्यानां जनानां जीवनस्य घटनाः एव विथिनामके रूपकप्रभेदे समावेशिताः। प्रेमाभिरामे रविपतिः नाट्यशास्त्रकारस्य नियमानां पालनं सम्पूर्णतया

चकार। एकाङ्कोपेतेऽस्मिन् विभागे कश्चित् सामान्यः नायकः भवेत् । अन्यान्यपि द्वित्रापि पात्राणि अपि अत्र समायोजयितुं शक्नोति। अस्मिन् शृङ्गारः एव अङ्गिरसो भवेत् । सामान्यस्य जनस्य कविकल्पितकथायामस्यां समाजे मध्यमः अथवा अधोवर्ती नायकः भवितुमर्हति। मार्गेषु वीथिषु अस्य अवतरणमित्यत एवास्य नामकरणमपि कृतं स्यात् ।

उपसंहारः

एवं विधौ परिशीलयामश्चेत् इदमनुभूतये अवगम्यते च यत् दृश्यकलानाम् आविर्भावे विकासे च नाट्यशास्त्रकारस्य भरतमुनेः योगदानम् अनुपमम् अद्वितीयञ्च वर्तते। इतोऽपि उपरूपकाणि कथावस्तुभेदान् नयिका-नायकभेदान् च परिशीलयामश्चेत् अवगच्छामो यत् ईदृशमेकम् अगाधतलस्पर्शि विस्तृतञ्चाध्ययनं विश्वस्मिन् इदं प्रथमतया अनेनैव कृतम् । अतः एव नाट्यशास्त्रस्य वैश्विकोऽङ्गीकारः आधुनिकयुगेऽपि सम्भवति। अद्यत्वे सर्वे मानवाः नाट्य-नृत्य-नाटकादीनि आस्वादमानाः सोल्लासं जीवन्ति इत्यस्य कारणीभूतो नूनमेव नाट्यशास्त्रप्रणेता भरतमुनिरेव इत्यत्र नास्ति सन्देहलेशः।

अत एव खलु दशरूपकाख्यस्य ग्रन्थस्य नान्दीश्लोके धनञ्जयेनेत्थमुक्तम्-

**दशरूपानुकारेण यस्य माद्यन्ति भावकाः।**
**नमः सर्वविदे तस्मै विष्णवे भरताय च॥**[15]

**सन्दर्भाः**


1. भरतमुनिविरचतं नाट्यशास्त्रम् , के.पी. नारायण पिषारोटि-अध्यायः 1 नाट्योत्पत्तिः - कारिका 01 (01), केरलसाहित्य, त्रिश्शूर, 2014
2. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 01, केरलसाहित्य , त्रिश्शूर, 2014
3. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 02, केरलसाहित्य, त्रिश्शूर, 2014
4. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 08, केरलसाहित्य , त्रिश्शूर, 2014
5. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 44, केरलसाहित्य , त्रिश्शूर, 2014
6. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 25, केरलसाहित्य , त्रिश्शूर, 2014
7. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 95, केरलसाहित्य , त्रिश्शूर, 2014
8. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 90, केरलसाहित्य , त्रिश्शूर, 2014

9. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 72, केरलसाहित्य, त्रिश्शूर, 2014
10. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 78, केरलसाहित्य, त्रिश्शूर, 2014
11. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 56, केरलसाहित्य, त्रिश्शूर, 2014
12. भरतमुनिविरचितं नाट्यशास्त्रम्, के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 82, केरलसाहित्य, त्रिश्शूर, 2014
13. भरतमुनिविरचितं नाट्यशास्त्रम् , के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 68, केरलसाहित्य , त्रिश्शूर, 2014
14. भरतमुनिविरचितं नाट्यशास्त्रम् , के.पी. नारायण पिषारोटि-अध्याय 20, दशरूपकविधानम् - कारिका 99, केरलसाहित्य, त्रिश्शूर, 2014
15. श्रीधनञ्जयविरचितं दशरूपकम् , डॉ. श्रीनिवास शास्त्री, प्रथमः प्रकाशः - कारिका 02, साहित्य भण्डार, मेरठ, 1969

**सहायकग्रन्थाः**

1. भरतमुनिविरचितं नाट्यशास्त्रम् , के.पी. नारायण पिषारोटि, केरलसाहित्य, त्रिश्शूर 2014
2. नाट्यशास्त्र आफ भरतमुनि (आङ्गल अनुवादसहितम, मनोमोहन् घोष् , एष्याटिक् सोसौटि ऑफ वेङ्गाल, कलकत्ता, 1951
3. श्रीधनंजयविरचितं दशरूपकम् , काशीनाथ पाण्डुरङ्ग परब, सत्यभामाबाई पाण्डुरङ्क, मुम्बई, 1941
4. कालिदासस्य संपूर्णकृतयः, केरलवर्मा वलियकोयिक्कल तम्पुरान, डी.सी. बुक्स, कोटट्यम, केरलम् , 2010
5. महाकवि शूद्रकप्रणीतं मृच्छकटिकम् , प्रो. जयशङ्करलाल त्रिपाठी, कृष्णदास संस्कृत सीरीज् , वाराणसी, 2022
6. मत्तविलासप्रहसन् महेन्द्रवर्मन्, कपिल्देव् गिरी, चौखम्बा विद्याभवन्, वाराणसी, 2008
7. उन्मत्तराघवम् (संस्कृत एवम् हिन्दी अनुवाद) भास्करभट्ट, रांपाल् शास्त्री, हरिदास् संस्कृत सीरीज् , 1973
8. Sanskrit Drama and Dramatists, K.P. Kulkarni, 1927

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# प्राचीनभारतीयशिक्षणप्रणाल्याः वर्तमानकाले प्रासङ्गिकता

**डॉ. हेमन्तकुमार चतुर्वेदी***

**सारांशः -** मानवस्य शारीरिक-मानसिक-आध्यात्मिकविकासस्य भारते प्राचीनकाले सूदृढा शिक्षणपद्धतिः विद्यमाना आसीत् । शिक्षा एकं पवित्रं कर्तव्यं मन्यते स्म। देशकालपरिस्थितिं ध्यात्वा वेद-इतिहास-पुराण-तर्कशास्त्र-नीतिशास्त्र-धर्म-दर्शन-व्याकरणविषयैः सह विविधशिल्पशास्त्राणां यथा यन्त्रप्रयोगः विषापहरणं, रत्नपरीक्षा, दन्तव्यापारः, पुस्तकव्यापारः, विविधविज्ञानाञ्च यथा - शल्यविज्ञानं, भैषजविज्ञानं, खगोलविज्ञानं, भूगर्भशास्त्रं, गणितम् , इत्यादीनाम् अध्ययनं प्रचलितम् आसीत् । शिक्षा पूर्णत आवासीया आसीत् । परञ्च आरम्भिकम् अक्षरज्ञानं गृहेऽपि दीयते स्म। विद्यार्थी गुरोः आश्रमे निवसन् तस्य सान्निध्ये ज्ञानार्जनं करोति स्म। विद्यार्थी **ब्रह्मचारी** इति कथ्यते स्म अथ च उपनयनसंस्कारपश्चादेव सः वेदाध्ययनाधिकारी भवति स्म। ब्रह्मचारिणः आवासः भोजनं, वस्त्राणि, शयनम्, उत्थापनम् इत्यादीनि सर्वाणि निश्चितानि आसन् । भोजनार्थं भिक्षाटनं क्रियते स्म। विद्यार्थी धनिकः आसीत् निर्धनो वा, राजपुत्रः आसीत् सेवकपुत्रो वा, सर्वेभ्यः समाननियमाः आसन् । गुरुशिरूष्ययोर्मध्ये मधुरसम्बन्धः आसीत् । गुरुः विद्यार्थिभिः सह पितृवत् भ्रातृवत् मित्रवच्च व्यवहरति स्म। प्रायोगिकशिक्षणप्रशिक्षणे विशेषम् अवधानं दीयते स्म। ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राः स्त्रियश्च सर्वे अध्ययनं कुर्वन्ति स्म। परञ्च शूद्रेभ्यः शिल्पशास्त्राणां स्त्रीभ्यश्च ललितकलानां विशेषप्रशिक्षणं दीयते स्म।

**कुञ्जीशब्दाः -** शिक्षा, वैज्ञानिकी, श्रेयप्रेयः, उपनयनम्, ब्रह्मचारी, वेदः, भिक्षाटनम्, समावर्तनम् , उपाकर्म, शिल्पशास्त्रम् , समावेशी, ज्ञान-विज्ञानम् ।

*सहायक आचार्य, संस्कृतसाहित्य, बाबागंगादास राजकीय महिला महाविद्यालय, शाहपुरा, जयपुर

**प्रस्तावना**

मनुष्यस्य सर्वाङ्गीणविकासाय शिक्षा आवश्यकं तत्त्वमस्ति। अपरेषु शब्देषु कथितुं शक्यते यत् कस्यापि राष्ट्रस्य समाजस्य वा विकासः तस्य नागरिकाणामुपरि निर्भरो भवति। अथ च नागरिकाणां विकासः शिक्षाव्यवस्थायां निर्भरोऽस्ति। यावत्प्रकारकं शिक्षणं भविष्यति, तावदेव तेषां चिन्तनं, मननं व्यवहारश्च तथा च तदुनरूपा एव राष्ट्रनिर्मितिः भविष्यति। एवं शिक्षा **राष्ट्रविकासस्य धूरी** इति वर्तते। अथ च राष्ट्रस्य समाजस्य वापि इदं दायित्वमस्ति यत् तत् ईदृशीं शिक्षाप्रणालीं स्थापयेत् या उद्देश्यपूर्णा, समावेशी, वर्तमानावश्यकताः पूरयितुं समर्था समस्यानां समाधाने च सक्षमा स्यात् । भारतदेशः ज्ञान-विज्ञान-शिक्षणक्षेत्रुषु प्राचीनकालादेव अग्रेसरः अस्ति। अत्र शिक्षा पवित्रतमं कर्तव्यं मन्यते तथा च अध्ययन-अध्यापनयोः अत्र प्राचीनकाले एका सुनियोजिता वैज्ञानिका च पद्धतिः विराजते स्म। इयं शिक्षणव्यवस्था (अर्थात् अस्या उद्देश्यानि, अध्ययनविधयः विषयवस्तुनि च) वर्तमानयुगे प्रासङ्गिकी उपयोगिनी अस्ति न वा इत्यस्मिन् प्रश्ने प्रस्तुतमिदं शोधपत्रम् -

**परिचयः**

प्राचीनभारतीयशिक्षणप्रणाल्यां शिक्षा एकं सोद्देश्यं सर्वोत्तमं कर्तव्यं मन्यते स्म। संस्कृतिसंरक्षणं राष्ट्रियभावनायाः स्थापनं सामाजिकसमरसता च अस्या उद्देश्यानि आसन्। अतोऽत्र जनस्य शारीरिक-मानसिक-चारित्रिक-आध्यात्मिकोन्नतये विशेषम् अवधानं दत्तम्। अतः भौतिकतत्त्वानाम् आध्यात्मिकतत्त्वानां च उभयविधं शिक्षणमत्र आसीत् । अथ च चरित्रं सर्वोपरि आसीत् । उक्तञ्च भर्तृहरिणा -

**''शीलं परं भूषणम्''।**[1]

अत्रेदं ध्यातव्य यत् भौतिकतत्त्वानां विकासः आध्यात्मिकतत्त्वैः सह सम्बन्धितोऽस्ति अर्थात् भौतिकसंसाधनानां विज्ञानस्य वा विकासः मानवस्य समाजस्य राष्ट्रस्य च कल्याणाय भवतु न तु निजलाभाय। अत्र प्रकृतेः रक्षणं महत्त्वपूर्णमस्ति। एतदर्थम् अत्र संसाधनानां सदुपयोगे बलं दत्तं न तु विदोहने। उक्तं हि कठोपनिषदि -

**श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्तिधीरः।**
**श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते॥**[2]

एवं प्रकारेण श्रेय-प्रेयतत्त्वानि आधारिकृत्य विविध-विषयाणां ज्ञानं छात्रेभ्यः दीयते स्म। यथा - वेदः, पुराणम्, इतिहासः, धर्मः, दर्शनं, व्याकरणं, तर्कशास्त्रं, नीतिशास्त्रं दन्तव्यापारः, यन्त्रप्रयोगः, रत्नपरीक्षा, विषापहरणं शल्यचिकित्साविज्ञानं, भैषजविज्ञानं, खगोलशास्त्रं, भूगर्भविज्ञानं लेखकर्म इत्यादयः।

**शिक्षणकालः**

प्राचीनकाले औपचारिकशिक्षणस्य व्यवस्थितपद्धतिः विद्यामाना आसीत् । शिक्षाप्राप्तये उपनयनसंस्कारः आवश्यकः आसीत् । बालकानाम् उपनयनसंस्कारः वर्गानुसारं पञ्चवर्षेभ्यः आरभ्य अष्टवर्षाणि यावत् क्रियते स्म । -

**ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।**
**राज्ञो बालार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे।।**[3]

उपनयनपश्चात् विद्यार्थी गुरोः आश्रमे निवसन् तस्य मार्गनिर्देशने अध्यापनं करोति स्म। वस्तुतः उपयनसंस्कारपश्चादेव विद्यार्थी वेदाध्ययनस्य अधिकारी भवति स्म। अध्ययने पूर्णे जाते **समावर्तनसंस्कारो** भवति स्म। समावर्तनसंस्कारेण संस्कारितः विद्यार्थी स्नातक इति कथ्यते स्म। स्नातकः सर्वत्र पूज्यते स्म। समाजे तस्य महती प्रतिष्ठा आसीत् । औपचारिकशिक्षादतिरिक्तं गृहेऽपि बालकं प्रारम्भिकम् अक्षरज्ञानं शिक्ष्यते स्म। अथ च इदमपि अवधानं दीयते यत् बालकस्य पितरोः अन्यपरिजनानां च व्यवहारः सौम्यः तेषां मध्ये मधुरसम्बन्धो भवेत् । अस्य बालकस्य व्यवहारे विशेषः प्रभावो भवति स्म।

**विद्यार्थीजीवनम्**

विद्यार्थी ब्रह्मचारी इति कथ्यते स्म। यतो हि तेन ब्रह्मचर्यस्य नियमाः आवश्यकत्वेन पालनीयाः आसन् । ब्रह्मचारिणः कृते ईदृशाः नियमाः निर्मिताः येषामनुपालनेन सः स्वकीयजीवने विकटतमास्वपि परिस्थितिषु शारीरिकसामर्थ्यं मानसिक-संतुलनञ्च नैव त्यजति स्म। एतदर्थं ब्रह्मचारिणः आवासः, भोजनं, वस्त्राणि, शयनं, उत्थानम् इत्यादीनि सर्वाणि निश्चितानि आसन् । ब्रह्मचारी भूतले एव स्वपिति स्म। तस्मै नृत्य-संगीत-वाद्येत्यादिमनोरंजक-साधनानि वर्जितान् आसन् । तस्य वस्त्राणि सामान्यानि आसन् । केवलं द्वे वस्त्रे स धारयति स्म उत्तरीयं वासश्च। दण्ड-कमण्डलुमौञ्जीधारणम् आवश्यकम् आसीत् । नित्यस्नानम् अनिवार्यम् आसीत् । सः (ब्रह्मचारी) परिश्रमी, जितेन्द्रियः कर्तव्यनिष्ठो भवति स्म।

**सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम् ।**
**सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत् सुखम् ।।**[4]

ब्रह्मचारी वस्तुतः तपस्वी भवति स्म। सः क्रोधरहितः ईर्ष्यारहितः भवति स्म। सः वेदाध्ययनं करोति स्म।

**तपो विशेषैर्विविधैर्व्रतैश्च विर्विधचोदितैः।**
**वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना।।**[5]

सः गुरोः प्रागेव उत्थितो तथा च गुरोः पश्चादेव शयितो भवति स्म। मृदुः दान्तः स्वाध्यायशीलश्च भवति स्म ।

**आहूताध्यायी गुरु कर्मस्वचोद्यः पूर्वोत्थायी चोपशायी।**
**मृदुर्दान्तो धृतिमानप्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी॥**[6]

**गुरुशिष्यसम्बन्धः**

गुरुशिष्ययोर्मध्ये मधुरसम्बन्धः आसीत् । सः आश्रमे विद्यार्थिभिः सह पितृवत् मातृवत् अव्यवहरत् ।

**एकः पित्रोर्यथा भ्रात्रोः पृथग्गुरुपरिग्रहात् ।**
**राम एवाभवत् गार्ग्यो वासुभद्रोऽपि गौतमः॥**[7]

सः विद्यार्थिनां संरक्षकः मार्गदर्शकः मित्रञ्च अभवत् । तस्य स्वभावः सरलः मृदुश्च अभवत् । वस्तुतः स धनप्राप्तये आजीविकायै वा न पाठयति स्म अपितु समाजकल्याणस्य राष्ट्रोन्नतेश्च भावाना मनसि निधाय छात्रान् शिक्षयति स्म। यथा नदी पिपासोः पिपासां शान्तये जलं प्रवाहयति, वृक्षः बुभूक्षितस्य बुभूक्षां शान्तये फलानि ददाति, सूर्यः यथा जगत् प्रकाशयितुम् उदेति तद्वत् सः जनकल्याणाय शिक्षयति स्म।

**प्रिये स्वाध्यायप्रवचने भवतो युक्तमना भवत्यपराधीनो हरहरर्थान् साधयते सुखं स्वपीति।**[8]

आचार्यः स्वयं सत्यनिष्ठः कर्तव्यपरायणः आदर्शः सन् स्वकीयव्यवहारेण विद्यार्थिनः प्रेरयति स्म। **सत्यं वद, धर्मं चर। स्वाध्यान्मा प्रमदः। यान्यनवद्यानि कर्माणि तानिसेवितव्यानि, नो इतराणि**[9] गुरुशिष्ययौ सहैव निवसतः स्म, सहैव भक्षयतः स्म, सहैव उन्नतिं कामयेते स्म।

**सहनाववतु सहनौ भुनक्तुः। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै॥**[10]

**शिक्षणविधियः**

प्राचीनकाले यदा लेखनकलायाः अभावः आसीत् तदा वैदिकमन्त्राणां शुद्धोच्चारणे, अनुकरणे स्मरणे च विशेषावधानं दीयते स्म। एतदर्थम् अष्टप्रकारकाः पाठाः विनिर्मिताः -

**जटा माला शिखा रेखा ध्वजो दण्डो रथो धनः।**

विषयानां व्यापकतां गांभीर्यं अथ च छात्राणां मानसिकस्तरं विचार्य, विविधशिक्षणविधीनां प्रयोगं कुर्वन्ति स्म आचार्यः। प्रश्नोत्तरविधिना आचार्यः विषयं स्पष्टयति स्म अथ च छात्राणां मानसिकस्तरं तर्कशक्तिं ज्ञातुं जिज्ञासाञ्च जनयितुं प्रयतते स्म-

**केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।**
**केनेषितं वाचमिमां वदन्ति चक्षुः श्रोत्रं क उदेवो युनक्ति॥**[11]

आचार्यः गंभीरदार्शनिकविषयान् यथा - आध्यात्मिकविद्या, ब्रह्मविद्या, ओङ्कारस्वरूपं, व्याख्यानपद्धत्याः स्पष्टं करोति स्म। ओङ्कारस्य व्याख्या एवं कृता -

**एतद्ध्येवाक्षरं ब्रह्म एतदेवाक्षरं परम्।**
**एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।**
**एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।**
**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।।**[12]

आत्मा, शरीरं,बुद्धिः, मनः इति तत्त्वानि दृष्टान्तविधिना विवेचितानि -

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धिः मनः प्रग्रहमेव च।।**[13]

एतदतिरिक्तं विचारविमर्शः संगोष्ठिः वाद-विवादः, शास्त्रार्थम् इत्यादयः अनेकाः शिक्षणपद्धत्यः आसन् तासु छात्राः प्रत्यक्षरूपेण सम्मिलिताः भवन्ति स्म। विद्यार्थिनां ज्ञानस्तरं परीक्षणाय शालाकापरीक्षा, शङ्कासमाधानं, मौखिकपरीक्षणं प्रायोगिकपरीक्षणं च इत्यादयः विविधाः परीक्षाप्रणाल्यः प्रचलिताः आसन् । अथ च विद्यार्थिनः प्राप्तज्ञानस्य प्रदर्शनं गुरोः समक्षं बहिरागतस्य आचार्यस्य समखं व प्रत्यक्षरूपेण कुर्वन्ति स्म।

**समावेशी शिक्षा**

प्राचीनभारतीयसमाजः वर्णव्यवस्थायाम् आधारितः आसीत् । अर्थात् समाजः चतुर्भागेषु विभक्तः आसीत् । ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रश्च। अत्रेदं विशेषेण ध्यातव्यं यत् केचनकथयन्ति यत् ब्राह्मणक्षत्रियवैश्यानामेव शिक्षायामधिकारः आसीत् शूद्राणाम् आश्रमे प्रवेशः वर्जित आसीत् । परञ्च इदं समीचीनं नास्ति यतो हि शूद्राणानां पठनस्य अनेकानि प्रमाणानि प्राप्यन्ते। यथा - **आश्वलायन गृह्यसूत्रे शूद्राणां समावर्तनस्य**[14] विधि वर्णितः अस्ति। समावर्तनसंस्कारश्च ब्रह्मचारिणः आश्रमे शिक्षासमाप्तौ क्रियते स्म। महाभारते अपि शिक्षायां चतुर्णां वर्णानां प्रवृत्तिः स्पष्टरूपेण प्रदर्शिता -

**इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती।**
**विहिता ब्राह्मणा पूर्वं लोभादज्ञानतां गता।।**[15]

मनुना अनेके शूद्राचार्याः वर्णिताः । परञ्च शूद्राः शिल्पविद्यायां विशेषणरूपेण शिक्षिताः भवन्ति स्म। पुरुषैः सह स्त्रीणामपि शिक्षायां समानरूपेण अधिकारः आसीत् । वेदेषु अनेकाः ईदृशाः स्त्रियः उल्लिखिताः सन्ति ताः वैदिकवाङ्मयस्य अध्ययने अध्यापने च निपुणाः आसन् । यथा - **लोपामुद्रा, विश्ववारा, अपाला, आत्रेयी** इत्यादयः। अथर्ववेदानुसारम् - **ब्रह्मचर्येण कन्या युवानं विन्दतेपतिम्** । उपनिषत्सु **गार्गी मैत्रेयी** इत्यादयः विदुष्यः प्रातः स्मरणीयरूपेण उल्लिखिताः। महाभारते स्त्रीभ्यः

ललितकलानां प्रशिक्षणस्य उल्लेखः प्राप्यते अथ च स्वाध्यायस्यापि प्रमाणं प्राप्यते -

**अपि चैताः स्त्रियो बालाः स्वाध्यायमधिकुर्वते।**[16]

स्त्रियः काव्यरचनामपि कुर्वन्ति स्म। गाथासप्तशत्यां कवयित्रीणां नामानि प्राप्यन्ते यथा - **शीलभट्टारिका, देवी, विजयाङ्का, मधुरवाणी, अभिरामकामाक्षी, प्रियंवदा, वैजयन्ती** इत्यादयः। अनेन ज्ञायते यत् तस्मिन् काले स्त्रीशिक्षा प्रचलिता आसीत् ।

**निष्कर्षः**

प्राचीनभारतीयशिक्षापद्धतिः वैज्ञानिकी छात्राणां व्यक्तित्वनिर्माणे च पूर्णतः सक्षमा आसीत्। भौतिकोन्नतिम् आध्यात्मिकोन्नतिं च ध्यात्वैव अस्याः स्वरूपम् उद्देश्यानि च निर्धारितानि। छात्राः ग्रामस्य नगरस्य वा दूरं वने सुरम्यवातावरणे गुरोः आश्रमे तस्य मार्गानिर्देशने च अध्ययनं कुर्वन्ति स्म। शिक्षापूर्णतः आवासीया आसीत्। प्रायोगिकशिक्षणप्रशिक्षणे बलं दत्तम् । चरित्रनिर्माणं शिक्षाया मुख्योद्देश्यमासीत् । शिक्षाप्रणली समावेशी आसीत् अर्थात् ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां सर्वेषां कृते आसीत् । पुरुषैः सह स्त्रीणामपि शिक्षायामधिकारः आसीत् । अनेन कथितुं शक्येत यत् इयं प्रणाली वर्तमानसमयेऽपि छात्राणां व्यक्तित्वनिर्माणे अथ च राष्ट्रनिर्माणे पूर्णरूपेण सक्षमा अस्ति।

**सन्दर्भाः**


1. नीतिशतकम् 83
2. कठोपनिषद् अ. 1 व 2
3. मनुस्मृतिः 2.37
4. महाभारतम्
5. मनुस्मृतिः 2.164
6. महाभारतम् आदिपर्वः 83.2
7. सौन्दरमद 1.23
8. शतपथब्राह्मण 11.5.7.1
9. तैत्तिरीय उपनिषद् (शिक्षावल्ली अनु. 11)
10. तैत्तिरीय उपनिषद् (भृगुवल्ली)
11. केनोपनिषद् (द्वितीयवल्ली 1617)
12. कठोपनिषद् (तृतीयवल्ली, 3)
13. कठोपनिषद्
14. आश्वलायन गृह्यसूत्र, 3.6
15. महाभारतम्
16. अरण्य 34.71

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# भगवद्गीतानुसारं स्थितप्रज्ञलक्षणानि

**देवज्योति-कुण्डुः***

**सारांशः -** श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वणः अंशविशेषः। तत्र श्रीकृष्णार्जुनयोः संवादेन प्रवृत्तिनिवृत्तिलक्षणं धर्मद्वयं सुवर्णितमस्ति। कर्तव्याकर्तव्यविचारः नीतिविषयकोपदेशः ज्ञानकर्मविचारः इत्यादीनि बहूनि तत्त्वानि गीताशास्त्रे समुपलभ्यन्ते। तत्र सांख्ययोगाध्याये भगवता श्रीकृष्णेन स्थितप्रज्ञस्वरूपं प्रतिपादितम् । स्थितप्रज्ञः जन एव स्थितधीः मुनिः सर्वकामविरतः इन्द्रियनिग्रहवान् भवति। स कथं तथा भवति, किं तस्याचरणं भवति, किं चानुभवतीति सर्वमपि विविधश्लोकैः गीताशास्त्रे निरूपितम् । तदेव अत्र शोधदिशा प्रस्तुतम् ।
**कुञ्जीशब्दाः -** स्थितप्रज्ञः, इन्द्रियाणि, विषयाः, मोक्षः, विद्या, अविद्या।

सांख्ययोगाख्ये द्वितीयाध्याये भगवान् श्रीकृष्णोऽर्जुनाय समाधिविषये उक्तवान्। सर्वकर्मसन्न्यासः संसारमोहत्याग एव हि मोक्षहेतुः। अतो मोहत्योगेन एव श्रोतव्यस्य श्रुतस्य च विषये वितृष्णोपजायते। विविधफलश्रुतिश्रवणेन विक्षिप्ता बुद्धिर्यदा समाध्यवस्थायां निश्चला तिष्ठति, तदा तत्त्वज्ञानप्राप्तिर्भवति। चित्तं यदा इतस्ततो न धावित्वा ध्येये वस्तुनि स्थिरा भवति, तदा चित्तावस्था निश्चलेति कथ्यते। नित्यवस्तुनि चित्तसमाधानमेव समाधिः। योऽवस्थामेतां संप्राप्नोति, स एव स्थितप्रज्ञो भवति। एतत्सर्वं भगवद्वचनं श्रुत्वार्जुनस्य मनसि प्रश्नः समुत्थितः। तस्मात्स भगवते स्थितप्रज्ञलक्षणं पृष्टवान्। समाधिस्थ एव स्थितप्रज्ञो भवति। बुद्धेः स्थितित्वात्स्थितधीरपि स्थितप्रज्ञः कथं भाषते, कथं च विचरत्येत्सर्वं ज्ञातुमिष्टवान् अर्जुनः। अतोऽत्र स्थितप्रज्ञलक्षणं पृच्छ्यते।

*शोधच्छात्रः, वैदिकदर्शनविभागः, संस्कृतविद्याधर्मविज्ञानसङ्कायः, काशी-हिन्दू-विश्वविद्यालयः वाराणसी, उत्तरप्रदेश

तदुक्तम् -

**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।**
**स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ।।1** इति।

एतत् श्रुत्वार्जुनप्रश्नं भगवान् श्रीकृष्णः तं स्थितप्रज्ञलक्षणमुवाच। यदा मनुष्यस्य सर्वे कामाः नश्यन्ति, तदा तुष्टेः कारणस्याभावो भवति। तदा कस्यापि बाह्यविषयस्यापेक्षा न भवति। स स्वयमेव तुष्टस्तिष्ठति। परमार्थदर्शनामृतलाभेन अन्यं किमपि तदा स न वाञ्छति। सर्वत्यागेन ब्रह्मानन्दलाभेन चात्मारामो भवति सः। अतोऽस्मिन् समये आत्मनात्मविवेकप्रज्ञा जायते। तदा एव स स्थितप्रज्ञो भवति। भाष्यकारः श्रीशङ्कराचार्यः स्थितप्रज्ञशब्दस्य व्युत्पत्तिमेवं प्रदर्शितवान् - ''स्थितप्रज्ञः स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञः'' इति। एतदुक्तम् -

**प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।**[2] इति।

तदा स स्थितप्रज्ञः दुःखप्राप्तावपि दुःखितो न भवति, सुखेष्वपि सुखी न भवति। अर्थादग्नौ इन्धनानि प्रदीयन्ते चेद्यथाग्नेर्वर्धनं दृश्यते, तथा विषयसुखकारणात् स्पृहावृद्धिरपि स्वाभाविकी। किन्तु स्थितप्रज्ञस्य तथा न भवति। अतः स सुखदुःखाभ्याम-विचलितस्तिष्ठति। एवं विषयवितृष्णाकारणात्सुखदुःखाभावाच्च तस्यासक्तिः, भयं, क्रोध इत्यादयोऽपि न जायन्ते। स स्थितप्रज्ञः स्थितधीः मुनिरुच्यते -

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।**[3] इति।

सम्प्रति तस्य स्थितप्रज्ञस्य मुनेर्वा स्वरूपमुच्यते भाष्यकारेण श्रीमता शङ्कराचार्येण। सर्वेष्वपि विषयेष्वनभिस्नेहस्तिष्ठति स्थितप्रज्ञः। स सुखं सम्प्राप्य प्रसन्नो न भवति, अशुभञ्च सम्प्राप्य न द्वेष्टि। एवं तस्य हर्षविवादवर्जितस्य बुद्धिः प्रतिष्ठिता भवति। यथा कूर्मो भयात्स्वस्याङ्गान्युसंहरति, तथैव ज्ञाननिष्ठः सर्वेभ्यो विषयेभ्य इन्द्रियाण्युपसंहरति। अतः स्थितप्रज्ञस्तस्याङ्गानि विषयदेशान् प्रति न चालयति, स्ववशे एव स्थापयतीत्यर्थः । एवं तस्य प्रज्ञाविषये गीताश्लोका एवं श्रूयन्ते -

**यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।**
**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।**
**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।।**[4] इति।

अत्र शङ्का भवति। यथा स्थितप्रज्ञः सर्वविषयेभ्यः इन्द्रियाण्युपसंहरति, तथातुरोऽपि तु कूर्माङ्गानीव विषयेभ्य इन्द्रियाण्युपसंहरति। तद्विषयेऽभिप्रायो हीत्थम् -

**विषया विनिवर्तन्ते निराहारस्य देहिनः।**
**रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते।।**[5] इति।

अर्थादिन्द्रियैर्विषयभोगेऽप्रवृत्तस्यापि विषयोपभोगोपरतिर्भवति, किन्तु तत्र विषयतृष्णायाः निवृत्तिर्न जायते। अत आतुरो न तु जितेन्द्रियः, स केवलं जराकारणाद्विषयभोगेऽसमर्थो भवति। अतो भोगवासना तु तिष्ठत्येव। तस्याः नाशो न भवति। स्थितप्रज्ञस्य न तथा, विषयभोगेच्छाशून्य एव स्थितप्रज्ञो भवति। परमार्थतत्त्वमुपलभ्य 'अहम् एव तद् ब्रह्म अस्मि' इत्येतावत्प्रकारको भाव उत्पद्यते। तेन वासनाद्यभावादिन्द्रियनिग्रहो जायते। श्रीशङ्करोऽत्राभिप्रायं कथयति - ''नासति सम्यग्दर्शने रसस्योच्छेदः। तस्मात्सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्तव्यमित्यभिप्रायः'' इति।

इन्द्रियाणि स्ववशे स्थापयितव्यानि। तदैव बुद्धिः स्थिरा भवति। ये संयमे यत्नवन्तः, तेषामपि मनांसि विषयाभिमुखं प्रति गन्तुमर्हन्ति। प्रमत्तानीन्द्रियाणि तेषामपि यत्नानां सदसद्विचारवतां चित्तं विषयासक्तं कुर्वन्तीति भावः। अत इन्द्रियाणि संयम्य समाहितः सन्मद्गतचित्तवान् भव इति भगवान् कथयति। तादृशस्य समाहितचित्तस्यैवेन्द्रियाणि वशीभूतानि भवन्ति। तस्य प्रज्ञा प्रतिष्ठिता भवति। एवमुपदेशेन स्थितप्रज्ञविषये भगवता श्रीकृष्णेनोच्यते -

**यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।**
**इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।।**
**तानि सर्वाणि संयम्य युक्त आसीत मत्परः।**
**वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता।।**[6] इति।

एवमत्र भगवता इन्द्रियव्यापाराः निरूपिताः। स्ववशे इव इन्द्रियाणि स्थापनीयानि। संयतेन्द्रियस्यैव प्रज्ञा प्रतिष्ठिता भवतीत्युक्तम् । विषयेष्वासक्तिरेव सर्वेषामर्थानां मूलम् ।

विषयेभ्य इन्द्रियाणां निवृत्तिरेव मोक्षहेतुरिति पूर्वं भगवता स्पष्टं प्रतिपादितम् । यस्य पुरुषस्येन्द्रियाणि स्ववशे न तिष्ठन्ति, तस्य कामादिवासनाकारणान्मोक्षप्राप्तिरपि न भवति। अतो यः स्थितप्रज्ञो भवति, तस्यैव पुरुषस्य चित्तं समाहितं भवति, मोक्षलाभश्च तस्यैव भवति न त्वदृष्टस्यासन्न्यासिनः कामकामिनः। विषयमेतमुदाहरणेन भगवान् प्रतिपादितवान् -

**आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।**
**तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी।।**[7] इति।

अर्थाद्यथा जलराशिभिः परिपूर्णे समुद्रेऽन्यजलं प्रविश्य तत्र लीयते, किन्तु समुद्रस्य प्रशान्तिः तेन क्षुण्णा न भवति, विकाररहिततयैव जलं स्थिरं भवति, तथैवात्मज्ञाने

प्रतिष्ठस्य स्थितप्रज्ञस्यान्तः विषयाः प्रविश्यापि चित्तविक्षोभं न जनयन्ति। स एव संयतेन्द्रिय आत्यन्तिकीं शान्तिं लभते। किन्तु विषयभोगकामनावन्तः मोक्षाधिकारिणः न कथमपि भवितुमर्हन्ति । एवमत्रोदाहरणेन भगवान् श्रीकृष्णः अर्जुनाय स्थितप्रज्ञस्य एव मोक्षप्राप्तिः सम्भवति न त्वसन्न्यासिन इति स्पष्टीकृतवान् ।

कामान्विहायैव यो निःस्पृहस्तिष्ठति, किञ्च यस्य ममताभावोऽहङ्काराभावश्च तिष्ठति, स एव आत्यन्तिकशान्तिं प्राप्नोति। स एव वस्तुतः स्थिरप्रज्ञो भवतीत्यर्थः। अत्र भगवान् स्थितप्रज्ञस्य 'निःस्पृहः', 'निर्ममः', 'निरहङ्कारः' इति विशेषणत्रयमुक्तवान् । तत्र देहादिसर्वविधान् प्राप्ताप्राप्तविषयान् प्रति आसक्तिराहित्यमेव निःस्पृहत्वम् । विषयवस्तुनि ममत्वबुद्धिशून्यत्वं निर्ममत्वम् । 'अहं धनी', 'अहं मानी' इत्याद्याकारा बुद्धिः अहंकारप्रसूता। शङ्कराचार्योऽपि स्वभाष्ये स्पष्टतया एतानि विशेषणानि व्याख्यातवान् - ''निःस्पृहः शरीरजीवनमात्रे अपि निर्गता स्पृहा यस्य स निःस्पृह सन् । निर्ममः शरीरजीवनमात्राक्षिप्तपरिग्रहे अपि मम इदमिति अभिनिवेशवर्जितः। निरहङ्कारो विद्यावत्त्वाद् निमित्तात्मसम्भावनारहित इत्यर्थः'' इति। एवं ब्रह्मवित् स्थितप्रज्ञः सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्यां शान्तिं प्राप्नोति। एषा एव स्थितिः ब्राह्मी स्थितिरित्युच्यते। सर्वकर्मसन्न्यासेन ब्रह्मस्वरूपावस्थानमेव ब्राह्मी स्थितिः। अवस्थामेतां सम्प्राप्य जीवः पुनरपि मोहग्रस्तो न भवति। अन्तसमयेऽपि मृत्युसमयेऽस्यां ब्रह्मनिष्ठावस्थायां स्थित्वा मनुष्यः ब्रह्मणि लीनतारूपं मोक्षं प्राप्नोति। यश्च ब्रह्मचर्याश्रमादेव सन्न्यासग्रहणेन ब्रह्मण्यवतिष्ठति, तस्य तु मोक्षप्राप्तिर्भवत्येव। एवमत्र मोक्षस्तुतिर्विहिता -

**विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।**
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥**
**एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।**
**स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति॥**[8]

एवं विषयासक्तिराहित्यमेव मोक्षकारणमिति ज्ञायते। स्थितप्रज्ञस्यैव मोक्षेऽधिकारः। एवमत्र स्थितप्रज्ञलक्षणानि भगवता श्रीकृष्णेन उक्तानि।

**उपसंहारः**

एवं श्रीमद्भगवद्गीतायाः सांख्ययोगाख्ये द्वितीयाध्याये भगवता स्थितप्रज्ञलक्षणानि उक्तानि। विविधफलश्रुतिश्रवणेन विक्षिप्ता बुद्धिः यदा समाध्यवस्थायां निश्चला तिष्ठति, तदा तत्त्वज्ञानप्राप्तिर्भवति। योऽवस्थामेतां संप्राप्नोति, स एव स्थितप्रज्ञो भवति। अर्जुनस्य स्थितप्रज्ञविषयकजिज्ञासां श्रुत्वा भगवान् श्रीकृष्णः तस्मै तल्लक्षणानि उक्तवान् । कथं स्थितप्रज्ञः कथ्यते, स किंस्वभाववान् भवति, कथमाचरति, कथं चायुक्तः पुरुष आचरतीत्येतत्सर्वमपि भगवता श्रीकृष्णेन एवोपदिष्टम् । विषयासक्तिकारणा-दिन्द्रियाणि विचलितानि भवन्ति। असंयतेन्द्रियस्य मोक्षलाभो न सिध्यति। किन्तु य

इन्द्रियाणि स्ववशे स्थापयन्ति, विषयासक्तिं विना निःस्पृहः, निर्ममः, निरहंकारश्च यस्तिष्ठति, तस्यैव मोक्षेऽधिकारो भवति। मोक्षं सम्प्राप्य पुनस्तत्प्राप्तौ प्रमाणानि विफलानि भवन्तीत्यपि भगवता सम्यक् निरूपितम् । विद्याविरोधादेव खल्वविद्यानिवृत्तिर्भवति। एवमत्र भगवद्गीतानुसारं स्थितप्रज्ञलक्षणान्युक्तवा मोक्षस्वरूपमपि भाष्यकार-श्रीशङ्कराचार्यदिशा भगवदुक्तवचनान्यनुसृत्य संक्षेपेण प्रतिपादितमिति शम् ।

**सन्दर्भाः**

1. श्रीमद्भगवद्गीता, 2.54
2. श्रीमद्भगवद्गीता, 2.55
3. श्रीमद्भगवद्गीता, 2.56
4. श्रीमद्भगवद्गीता, 2.57-58
5. श्रीमद्भगवद्गीता, 2.59
6. श्रीमद्भगवद्गीता, 2.60-61
7. श्रीमद्भगवद्गीता, 2.70
8. श्रीमद्भगवद्गीता, 2.71-72

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# वेदेषु रसायनविज्ञानम्

**कृष्णकुमारपाण्डेयः***

**शोधसारः -** प्राचीनतमो ज्ञानराशिः वेदः। तत्र नैकविधं ज्ञानं विज्ञानं च सुविशंद लभ्यते। तत्र रसायनविज्ञानस्यापि सन्दर्भाः प्राप्यन्ते। तत्र स्वर्णलाक्षादिनर्माण-प्रक्रियायाः सुस्पष्टं वर्णनं लभ्यते। एवं रसायनविज्ञानस्य वैदिक सन्दर्भों उपस्थापनम् कृतं विद्यते।

चतुर्ष्वपि वेदेषु सर्वं निहितमिति सर्वजनसम्मतम् । वैदिकग्रन्थाः विपुला च संस्कृतिः अस्माकं जगतः सर्वदैव उपकरोति समृद्धं च करोति । वैदिक ज्ञानादृते नास्ति अस्माकं कुत्रापि गतिः यतोहि । अतः मदीयः चितो विषयः 'वेदेषु रसायनविज्ञानम्' अस्मिन् शोधपत्रे जलस्य उत्पत्ति, जलस्य महत्वम् , जलस्य गुणाः, जलस्य भेदाः, जलाद् सृष्टेरुत्पत्तिः, विविधाः धातवः, धातूनां मिश्रणम् , धातूनां विविधोपयोगाः, इमे विषया अत्र अभिनव विषयत्वेन वैज्ञानिकी पद्धत्या च आलोडनं कृत्वा मयाऽत्र प्रस्तोस्यन्ते। वैदिकपरम्परायाम् अनेके आचार्याः श्रमं विधाय निगूढवेदार्थमस्माकं समक्षे उपस्थासिरे । इदानीम् अस्मदीयङ्कर्तव्यं यत् वेदनिहितषियाणां प्रचारप्रसारो भवेत् इयं प्राचचारयिषा अस्मासु स्यादेव। वयममंस्महि यत् इदं शोधपत्रं ज्ञानाय अबुभूषिष्यत् इत्याशासिष्यामहि।

**कुञ्जीशब्दाः -** वेदः, रसायनम्, जलम् , धातवः, विज्ञानम् , मन्त्राः, मिश्रणम् , मित्रावरुणौ, इन्द्रः, अग्निः, आपः, सविता, मित्रः, वैश्वानरः, मातरिश्वा, महारसाः।

*शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः गङ्गानाथझापरिसरः, प्रयागराजः

**प्रस्ताविकम्**

शतपथब्राह्मणे कथितं यत् 'त्रयी विद्या ऋचो यजूँषि सामानि' इति। मन्त्राणां विद्या ऋक्, यजूँषि, सामानि इति त्रिविधा। अस्य मुख्यं कारणं रचनाविविधता। पूर्वं काव्यं ऋचा इति नाम्ना प्रसिद्धम् आसीत्, गीतरचना साम गद्यरचना च यजुष् इति कथ्यते स्म। गद्यपद्यगीतातिरिक्तं नान्यः कश्चन रचनाप्रकारः। वैदिकसंहितासु ऋग्यजुष् समादीन् विहाय न कोऽपि मन्त्रः दृश्यते। काव्यगद्यगीतव्यतिरिक्तं कदापि शास्त्रीयरचना न निर्मिता। जैमिनेः कथनं विद्यते यत् - **'तेषामृग् यत्रार्थवशेन पाद व्यवस्था। गीतिषु समाख्या। शेषे यजुः शब्द** इति। अपौरुषेयं वाक्यं वेद[1] इति सर्वजनविदितमस्ति। वेदशब्दः विद् धातोः घञ् प्रत्यये कृते निष्पद्यते । वेदशब्दः बहुष्वथेषु प्रयुज्यते । यथा -

**विद् सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।**
**विन्दति विन्दते प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ।।**[2]

सायणाचार्यमतेन 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।[3] चत्वारः वेदाः जगति प्रसिद्धाः वर्तन्ते। ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदश्चेति चतुर्ष वेदेष्वपि रसायनविषयकचर्चा बहुत्र श्रूयते। वेदे सर्वविधज्ञानं निहितमस्ति इति कारणादुच्यते मनुना सर्वज्ञानमयो हि सः[4] इति। अत्र सः पदेन वेदः गृह्यते। सर्वेषामपि ज्ञानानां मूलतत्वं वेद एवेति निश्चप्रचम् । विष्णुमित्रः वेदविषये ज्ञापयति यत् **'विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादि-पुरुषार्था इति वेदाः।**[5] **साक्षात्कृद्धर्माणःऋषयो बभुवुः। ते अवरेभ्यः असाक्षात्कृद्धर्मेभ्य उपदेशेन मन्त्रान् सम्प्रादुः।''**[6] **आद्युदात्तः शब्दराशेर्बोधकः, अपरश्च अन्तोदात्तः कुशुमुष्ट्यादेवर्बोधकः''**[7] **वेदं कृत्वा वेदिं करोति''** इति।

**वेदे जलतत्त्वविमर्शः**

वेदे रसायनविज्ञानेन सम्बद्धाः बहवः मन्त्राः समुपलभ्यन्ते। तत्र जलस्य उत्पत्ति, जलस्य महत्त्वम्, जलस्य गुणाः, जलस्य भेदाः, जलात् सृष्टेरुत्पत्तिः, विविधाः धातवः, धतूनां मिश्रणम्, धातूनां विविधोपयोगाः जलानां रत्नानञ्च औषधिरूपेण प्रयोगादि महत्वपूर्णविषयाः सन्ति विचारयोग्याः येषां पुनर्विलोकनं विश्लेषण विवरणञ्च शोधदृष्ट्या समुपयोगि विद्यते। अथर्ववेदस्य एकस्मिन् मन्त्रे जले अग्निः एवं सोमः भवतः। अत्र ध्यातव्यं यत् आक्सीजन इत्यस्य कृते अग्निः, मित्रः, वैश्वानरः, मातरिश्वादयादिशब्दानां प्रयोगो विद्यते। अपां राजा वरुणः यासु अप्सु वर्तते। सोमः यासु अप्सु वर्तते। यासु अप्सु स्थिताः विश्वे सर्वे देवाः ऊर्जम् अन्नं मदन्ति। वैश्वानरः अग्निः यासु प्रविष्टः। ताः आपः देव्यः इह स्थितं मामवन्तु । रसायनानां विषये ऋग्वेदस्य प्रथममण्डले सूत्रं निर्दिष्टमस्ति यत् मित्रवरुणयोः संयोगेन जलस्य प्राप्तिर्भवति इति। उक्तञ्च -

**मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।**
**धियं घृताचीं साधन्ता।।**[8]

अहमस्मिन् कर्मणि हविष्प्रदानाय 'पूतदक्षं पवित्रबलं' मित्रं हुवे। तथा 'रिशादसं रिशानां हिंसकानाम् अदसम् अत्तारं वरुणं च हुवे आह्वयामि। कीदृशौ मित्रावरुणो। घृतमुदकमुञ्चति भूमिं प्रापयति या धीर्वर्षणकर्म तां घृताचीं' धियं साधन्ता साधयन्तौ कुर्वन्तौ। जलविशेषेण मनुष्यः गतिं शक्तिं च प्राप्नोति। अथर्ववेदे रसायनविज्ञानविषये कानिचन महत्वपूर्णानि सूत्राणि निबद्धानि सन्ति तानि सर्वाणि मयाऽत्रोल्लिख्यते। जलस्योत्पत्ति विषये जले के गुणाः, जलस्य महत्त्वम् , इमे विषया उल्लिखिताः वर्तन्ते। जलस्योत्पत्तिविषये अथर्ववेदे उक्तं यत् जले अग्निसोमौ भवतः यथा - **अग्नीषोमौ बिभ्रति आप इत् ताः।**[9] इति।

**वेदे जलस्य गुणविमर्शः**

जलस्य गुणानां विषये अर्थवेदे प्रसङ्गः लभ्यते यत् **अप्सु - आसीन् मातरिश्वा प्रविष्टः।**[10]

जलस्य विविधान् गुणान् वर्णयन् उक्तं वर्तते हिमालयात् निस्सरनापः नद्यां प्रविष्टो भवति तेन जलविशेषेण हृदय रोगे लाभप्रदं भवति। स्यन्दयत् जलं शुद्धं गुणकरं च भवति। यथा -

**मित्रावरुणौ त्वा वृष्ट्यावताम् ।**[11]

**मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नेनो वृष्टिमावह।**[12]

हे मित्रावरुणौ त्वत्तः एव वृष्टिः संजायते। मित्रावरुणौ प्राणापानवायू वृष्ट्या जलवर्षणेन त्वा त्वामवतां रक्षताम् । 'वायुर्वै वर्षस्येष्टे' इत्युक्तत्वाद्वर्षाधीशो वायुः। स चाध्यात्मगतः प्राणोदानरूपो मित्रावरुणशब्दाभ्यामुच्यते। 'अनक्त्येनं व्यन्तु वय इत्यग्रं जुह्वामुपभृति मध्यं मूलमितरस्याम् । इतरस्यां ध्रवायाम् । वयः पक्षिण; व्यन्तु। 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु'। पक्षिरूपापन्नानि गायत्र्यादीनि छन्दांसि गच्छन्तु। प्रस्तरमादायेति शेषः। किंभूताः वयः। अक्तं रिहाणाः। अक्तं घृतलिप्तं प्रस्तरं लिहिनाः आस्वादयन्तः। रलयोरैक्यम् ।। 'मरुतामिति नीचैर्हत्वा तृणमादायानुप्रहरति। एकं तृणं प्रस्तरात्पृथक्कृ त्य प्रस्तरं नीचैर्हत्वाग्नौ प्रक्षिपेदिति सूत्रार्थः। मरुतामिति प्रस्तरदेवत्या बृहती कपिदृष्टा। चतुर्थः पाद आग्नेयः। हे प्रस्तर! त्वं मरुतां पृषतीर्गच्छ। मरुन्नामकानां देवानां सम्बन्धिनीः पृषतीर्वाहनरूपा अश्वाश्चित्रवर्णा गच्छ प्राप्नुहि। वायुवाहनवद्वेगेन गच्छेत्यर्थः। अन्तरिक्षं वशापृश्निर्भूत्वा। वशा स्वाधीना पृश्निल्पतनुर्गौर्भूत्वा दिवं गच्छ। कामधेनुवत्तृप्तिकरी भूत्वा स्वर्गं गच्छेत्यर्थः। ततः स्वर्गप्राप्तेरनन्तरं नोऽस्मदर्थं वृष्टिमावह भूलोके वृष्टिमानय । यद्वा। 'इयं वै वशापृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रतिष्ठितं

तेनेयं वशापृश्निः श्रुतेर्वशापृश्निशब्देन भूमिरुच्यते। वशापृश्निर्भूत्वा पृथिवी भूत्वा दिवं गच्छ। पृथिवीसंबन्धिभागानादाय द्युलोकं तर्पयेत्यर्थः। हे प्रस्तर, त्वमन्तरिक्षं गत्वा तत्रस्थान्मरुतः सवाहनान्संतर्प्य स्वर्गं गत्वा देवांश्च संतर्प्य पृथिव्यां वृष्टिं कुर्वित्याहुतिपरिणामः सूचित इति भावः। 'चक्षुष्पा इत्यात्मानमालभते हे अग्ने, त्वं यतश्चक्षुष्पा असि। चक्षुः पातीति चक्षुष्पाः। ज्वालयान्धकारं निवर्त्य चक्षुःपालकोऽसि। अतो म मम चक्षुः पाहि पालय। प्रस्तरप्रहरणप्रसक्तं चक्षुष उपद्रवं परिहरेत्यर्थः।

**वेदे जलस्य भेदविमर्शः**

वेदे एव जलस्य विविधाः भेदाः वर्णिताः। ते च -

1. धन्वन्यजलम् 2. अनूप्यजलम् 3. खनित्रजलम् 4. वर्ष्यजलम् 5. हैमवज्जलम् 6. उत्स्यजलम् 7. सनिष्यज्जलम् 8. सैन्धवजलम् 9. समुद्रिय जलम्।[13]

एकस्मिन् अथर्ववेदीयमन्त्रे जलस्य पञ्चगुणा उक्ताः - 1. तपस् , 2. हरस्, 3. अर्चिस् , 4. शोचिस्, 5. तेजस् च इति। (**आपो यद् वो तपः हरः अर्चिः शोचिः तेजः**[14])। पञ्चमकामडस्य एकस्मिन्नमन्त्रे हरित, रजत्, अयस्, इति धातुत्रयस्य तपनं विधाय यज्ञोपवीतनिर्माण विधिः दर्शितः।

**हरिते त्रीणि रजते त्रीणि अयसि त्रीणि तपसाविष्ठानि।**[15]

केन प्रकारेणरसायनोत्पत्तिः जायते एकस्मिन् स्थले उक्तं यथा - **आपो दिव्या अचायिसं रसेन समपृक्ष्महि।**[16] वृष्ट्या सोमादिदेवाः सम्मिल्य रसायन निर्माणं कुर्वन्ति। अनेन रसायनोदकेन मनुष्याः दीर्घायुः लभन्ते।

अथर्ववेदे शरीरविज्ञानदृष्ट्या एकस्मिन् स्थाने महत्वपूर्णं तथ्यमुक्तं वर्तते यत् शरीरे अष्टविधानि जलानि शरीरं धारयन्ति यथा - रस, रक्त, मांस, मेधा, अस्थि, मज्जा, वीर्य इमे शरीरे जलरुपेण भवन्ति। अन्यत्र उच्यते यत् -

**रात्री माता शिलाची स्परणी नाम।**[17]

**भद्रात् प्लक्षात् अश्वत्थात् खदिराद् धवात् ।**[18]

**पामसि स्वसा लाक्षे।**[19]

अनेन मन्त्र लाक्षायाः (Resin) निर्माणं भवति। विविधानां रोगाणाम् उपचारार्थम् एतस्य प्रयोगो भवति।

**वेदे विविधधातूनां विमर्शः**

रसायन पदार्थस्य निर्माणे कथं संलिप्ताः भवन्तीति वर्ण्यतेऽत्र **लवणेन सुवर्णं संदध्यात् सुवर्णेन रजतं रजतेन लोहं लोहेन सीसं सीसेन।**[20]

लवणेन सुवर्णस्य सज्जीकरं भवति। सुवर्णेन रजतस्य रजतेन लौहस्य । लौहेन सीसस्य उक्तञ्च छान्दोग्योपनिषदि -

**लवणेन सुवर्णं संदध्यात् , सुवर्णेन रजतं रजतेन त्रपु।**
**त्रपुणा सीसं सीसेन लोहं लोहेन दारु दारुणा चर्म॥**[21]

वेदे रसायनतत्वं प्रदर्श्य अवादि यास्केन निरुक्ते - **अथादित्यात् । ऊदीचि प्रथमसमावृत्त आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयम् अस्पर्शयन् धारयति तत् पिरदीप्यते।**[22]

**वेदे विविधदेवाः**

जले सर्वे देवाः निवसन्ति इति ऋग्वेदस्य दशमे मण्डले निर्दिष्टमस्ति - **यद्दे वा अदः शलीले सुसंरब्धा अतिष्ठत् ।**[23] अनयोत्तरेण चादित्याः स्तूयन्ते। यत् यदा हे देवाः अदः अमुष्मिन् सलिले यूयं सुसंरब्धाः सुष्ठु लब्धात्मानः अतिष्ठत स्थितवन्तः। आपो वा इदं सर्वम् । अप एव ससर्जादौ' (मनु. 1.8) इति श्रुतिस्मृती। अत्र अस्मिन् सलिले नृत्यतामिव वः युष्माकं संबन्धी तीव्रः दुःसहः रेणुः अंशभूत एकः अपायत अपागच्छत् । दिवं प्रति गत इति सूर्याभिप्रायम् । परा मार्ताण्डमास्यत् । **प्रविष्टा देवा सलिलानि आसन् ।**[24] जलस्य उपयोगः केन करणीयः इति शुक्लयजुर्वेदस्य नवमेऽध्याये -

**अपां रसम् उद्वयसं सूर्ये सन्तं समाहितम् ।**
**अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तमम् ।॥**[25]

जलेन सूर्यस्य उत्पति भवति इति एकस्मिन् मन्त्रे ऋग्वेदे मिलति -

**अत्रा समुद्रा आ गूढम् आ सूर्यम् अजभर्तन ।**[26]

अष्टमहारसाः सन्ति इति रसार्णव ग्रन्थे -

**माक्षिकं विमलं शैलं चपलं रसकस्तथा।**
**रस्यको दरदश्चैव श्रोतोऽञ्जन मथाष्टकम् ।॥**[27]

रसायनविषये - रसरत्नाकरे उक्तम् -

**किमत्र चित्रं रसको रसेन क्रमेण, कृत्वाऽम्बुधरेण रञ्जितः,**
**करोति शुल्बं त्रिपुटेन काञ्चनम् ।**[28]

**उपसंहारः**

अनेन व्याख्यानेन विदितं भवति यत् अथर्ववेदे रसायन विज्ञानस्य बहुत्रोल्लेखः विद्यते। जलस्य रसायनम् अन्येषमपि धातूनां रसायनेन समुल्लेखो वर्तते। वेदे सर्वं निहितमस्ति उक्तञ्च -

**वेदेषु विविधा विद्या वेदेषु विविधा कला।**
**वेदेषु ज्ञेयं विज्ञानं वेदेषु किं न विद्यते॥**

**सन्दर्भाः**


1. लौगाक्षिभास्करः, अर्थसंग्रहः, राजेश्वरशास्त्रीमुसलगांवकर, पृ. 36, चौखम्बासुरभारती प्रकाशन, वाराणसी, 2015
2. भट्टोजिदीक्षित, सिद्धान्तकौमुदी, गोविन्दाचार्यः, चुरादिगण, पृ. 294, चौखम्बासुरभारती, प्रकाशन, 2020
3. तै.सं.भा.पृ. 18, ऋग्वेदादिभाष्यभूमिका, दयानन्दसरस्वति, डॉ. रामप्रकाश वर्णी, आर्यसाहित्यप्रचार ट्रस्ट, दिल्ली, 2008
4. मनुः, मनुस्मृतिः, पं. हरगोविन्द शास्त्री, 2.6, चौखम्बा संस्कृत संस्थानम् , वाराणसी, 1995
5. सायणाचार्यः, ऋग्वेदप्रातिशाख्यम् , विष्णुमित्रः/विरेन्द्र कुमार वर्मा, पृ. 15, चौखम्बा संस्कृत प्रतिष्ठानम् , दिल्ली, 2015
6. यास्कः, निरुक्तम् , छज्जूरामशास्त्री, 1.6, मेहरचन्द लक्षणदास पब्लिकेशन, दिल्ली, 2016
7. वेदस्वरूपविमर्शः, श्रीकरपात्रीजी महाराज, पं. रामगोविन्द शुक्ल, पृ. 2, भक्तिसुधा साहित्य परिषद् कलकत्ता, 1980
8. ऋग्वेद, 1.2.7
9. अथर्ववेद, 3.13.5
10. अथर्ववेद 10.8.40
11. शुक्ल यजुर्वेद, 2.16
12. शुक्ल यजुर्वेद, 2.16
13. अथर्ववेद 1.6.4.19
14. अथर्ववेद 2.23.2
15. अथर्ववेद 5.28.1
16. अथर्ववेद 7.89.1
17. अथर्ववेद 5.5.1
18. अथर्ववेद 5.5.5
19. अथर्ववेद 5.5.7
20. गोपथब्रा, 1.14 सम्पादकः एम. ब्लुमफील्ड अनुवाद; सूर्यकान्तः चौखम्बा संस्कृत संस्थान, वाराणसी, 2001
21. छान्दोग्योपनिषद् 4.17.7 ईशादि नौ उपनिषद् व्याख्याकार हरिकृष्णदास गोयन्दका गीताप्रेस, गोरखपुर, 2000
22. यास्कः, निरुक्तम् 7.23 व्याख्याकारः, छज्जूरामशास्त्री, मेहरचन्द लक्षमणदास पब्लिकेशन दिल्ली, 2016
23. ऋग्वेद, 10.72.6

24. अथर्ववेद 10.8.40
25. शुक्ल यजुर्वेद, 9.6
26. ऋग्वेद 10.72.7
27. रसार्णव 7.2.3 व्याख्याकारः इन्द्रेश त्रिपाठी चौखम्बा संस्कृत संस्थान, वाराणसी, 2001
28. नित्यनाथ सिद्ध रसरत्नाकरः 1.3 चौखम्बा ओरियण्टालिया, वाराणसी, 2008

**सहायकसन्दर्भग्रन्थाः**

1. अर्थसंग्रह;, लौगाक्षिभास्करः, राजेश्वरशास्त्रीमुसलगांवकर, चौखम्बा संस्कृत संस्थान, वाराणसी, 2015
2. सिद्धान्तकौमुदी, भट्टोजिदीक्षितः, गोविन्दाचार्यः, चौखम्बासुरभारतीयप्रकाशन, वाराणसी, 2020
3. मनुस्मृतिः, मनुः, पं. हरगोविन्द शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 1995
4. ऋग्प्रातिशाख्यम् , आचार्यशौनकः, विरेन्द्रकुमार शर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2015
5. निरुक्तम्, यास्कः, छज्जूरामशास्त्री, मेहरचन्द लक्ष्मणदास पब्लिकेशन, दिल्ली, 2016
6. वेदस्वरूपविमर्शः, श्रीकरपात्रीजीमहाराज, पं. रामगोविन्द शुक्ल, भक्तिसुधा साहित्य परिषद् , कलकत्ता, 1980
7. अथर्ववेदः, सायणाचार्य, श्रीरामशर्मा, ब्रह्मवर्चस् , शान्तिकुञ्ज हरिद्वार, उत्तराखण्ड, 2002
8. ऋग्वेदः, सायणभाष्यम् , श्रीरामशर्मा, ब्रह्मवर्चस् , शान्तिकुञ्ज हरिद्वार, उत्तराखण्ड, 2002
9. शुक्लयजुर्वेदः, महीधरभाष्यम्, रामकृष्णशास्त्री, चौखम्बासुरभारतीप्रकाशन, वाराणसी, 2001
10. शतपथब्राह्मणम्, सायणाचार्य वेदार्थप्रकाशः, युगलीकिशोरमिश्र, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 2017
11. ईशादि नौ उपनिषद् , हरिकृष्णदास गोयन्दका, गीताप्रेस गोरखपुर, 2000
12. गोपथब्राह्मणम्, एम.ब्लुमफील्ड, सूर्यकान्तः, चौखम्बा संस्कृत संस्थान, वाराणसी, 2001
13. रसार्णव, इन्द्रेश त्रिपाठी, चौखम्बा संस्कृत संस्थान, वाराणसी, 2003
14. रसरत्नाकरः, नित्यनाथसिद्ध, श्रीनाथ, चौखाम्बा ओरियण्टालिया, वाराणसी, 2008

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# वेदेषु शिल्पविज्ञानम्

**केशवकुमार पाण्डेयः***

**शोधसारः -** प्रस्तुतशोधपत्रे **'वेदेषु शिल्पविज्ञानम्'** इति लोकोपकारिविषये अभिनवचिन्तनपूर्वकं किञ्चित् विषयप्रवर्त्तनं विहितम्। वैदिकसन्दर्भेषु दिव्यास्त्राणि, मानवीयशस्त्राणि, शत्रुनाशकशस्त्राणि, वास्तुशास्त्रम्, विविधशस्त्राणि अस्त्राणि चोल्लिखितानि सन्ति। अनेनेदं स्पष्टं भवति यत् वेदे सर्वज्ञानमयत्त्वं विद्यते। वैदिकसंस्कृतिः विविधाः ग्रन्थाश्चास्य लोकस्य सर्वदैव उपकाराय समृद्धये च विद्यन्ते। वैदिकज्ञानं विना नास्ति अस्माङ्कं कुत्रापि गति उक्तञ्च पतञ्जलिना ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। शोधपत्रेऽस्मिन् वेदे विद्यमानानां शिल्पविज्ञानविषयाणां सान्दर्भिकी चर्चा कृता, ते सर्वेऽपि विषया अत्र प्रतिपाद्यन्ते। वयं मीमांसामहे यदनेन शोधपत्रेण वेदेषु सर्वमस्तीति लोके ज्ञानाय अबुभूषिष्यन् इत्यमिमंसिष्यन्त।
**कुञ्जीशब्दाः -** वेदः, शिल्पम्, शस्त्रम्, पुरुषार्थः, धर्मः, निष्कारणः, हेतिः, अग्निः, वायुः, रुद्रः, तोकः, अघः, वज्रः, सैन्यः, वज्रिवः, वृत्रहन्ता, कृपणः।

**प्रास्ताविकम्**

विद् धातोर्घञा वेदशब्दो निष्पद्यते। विद् ज्ञाने, विद् विचारणे, विद्लृ लाभे विद् सत्तायाम् ''इत्यादिधातुभ्यो ज्ञानं सत्ता लाभश्चेति'' त्रयोऽप्यर्थाः सिद्धयन्ति। लाभशब्देन जीवनरूपा स्थितिरपि ग्रहीतुं शक्यते, सत्तापदेन चोत्पत्तिः। तेन उत्पत्तिः स्थितिश्चेत्युभयमपि विद्धातोरर्थोऽन्तर्भवति। घञ् प्रत्ययश्चापि भावे अकर्तरि च कारके

*शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः गङ्गानाथझापरिसरः, प्रयागराजः

विधीयते इति ज्ञानम्, ज्ञानसाधनम्, ज्ञानकर्म, ज्ञानाधिकरणम् , सत्ता, सत्तासाधनम् , सत्ताकर्म, सत्ताधिकरणम्, स्थितिः, स्थितिसाधनम्, स्थितिकर्म, स्थित्यधिकरणञ्चेति सर्वं वेदशब्दार्थतया व्याख्यातु शक्यम् । तत्र ग्रन्थात्मकेषु वेदेषु शब्दज्ञानसाधनत्वमेव समन्वावयन्ति प्रायेण विद्वांशः विदुष्यश्च। अन्वेषणप्रक्रियया परिशील्यमाने तु सर्वविधज्ञानसाधनत्वम् , ज्ञानरुपत्वम् चेत्याद्यापि वेदशब्दार्थे समन्वितं भवति। विष्णुमित्रो वदति यथा **विद्यन्ते ज्ञायते लभन्ते एभिर्धर्मादिपुरुषार्था इति वेदाः।**[1] मनुना वेदविषये उक्तं यथा **वेदोऽखिलो धर्ममूलम् ।**[2] वेदे अखिलधर्मतत्तवस्य मूलमस्तीति निश्चयेन वक्तुं शक्यते। विन्टरनित्स महोदयः स्वस्मिन् ग्रन्थे उक्तवान् - As the oldest Indian and also the oldest indo-germani literary monument the veda deserves an outstanding place in the history of world literature[3] वेद एव समेषां ज्ञानानां मूलं विद्यते। अयं हि ब्राह्मणानां निष्कारणो धर्मेति कथयन्ति महाभाष्यकाराः - **ब्राह्मणेन निष्कारणो धर्मः षड्ङ्गो वेदोऽध्येयो ज्ञेयश्च।**[4] वेदशास्त्रेण इष्टस्य प्राप्तिः अनिष्टस्य परिहारः, अलौकिकेन उपायेन निर्देशः भवति यत् सायणः **इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।**[5] चत्वारः वेदाः जगति प्रसिद्धाः वर्तन्ते। ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः वेदेषु शिल्प विषयिणी चर्चा बहूत्र श्रूयमाणो भवति। वेदेषु सर्वं निहितमस्ति इति दृश्यते । उक्तञ्च मनुना **सर्वज्ञानमयों हि सः।**[6] सर्वेषामपि ज्ञानानां मूलतत्वं वेद एवेति निश्चप्रचम् । मनुनाऽपि एकस्मिन् स्थाने वाचयाम्बभूव यत् **सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् । वेदेशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।।**[7]

**दिव्यास्त्राणि**

चतुर्ष्वऽपि वेदेषु शिल्प विषयकाः मन्त्राः बहुत्र दरीदृश्यन्ते। अहमत्र अस्मिन् शोधपत्रे दिव्यास्त्राणि, मानवीया अस्त्राणि शस्त्राणि च, शत्रुनाशक शस्त्राणि, वास्तुशास्त्रम्, विविधशस्त्राणि अस्त्राणि चोल्लिखितानि सन्ति। वेदे अस्त्रस्य (Missile) कृते हेति शब्दः तथा मेनि शब्दश्च प्रयुज्यते। दिव्यास्त्राणाम् असाधारण प्रभावः प्रकृति जन्यो भवति। विद्युत् , अग्नि, वायु तथा ऋषिर्प्रदत्त अस्त्राणि भवन्ति। यजुर्वेदे पाशुपतास्त्र विषये चर्चा दृश्यन्ते एतस्य अपरन्नाम रुद्रास्त्रमिति। उक्तञ्च **परिनो रुद्रस्य हेतिर्वृक्त्तु.....**[8] रुद्रस्य शिवस्य हेतिरायुधं नोऽस्मान् परिवृणक्तु परितो वर्जयतु। अस्मान्मा हन्त्वित्यर्थः। त्वेषस्य क्रुद्धस्य अघायोः द्रोग्धुर्दुर्मतिर्दुष्टमतिर्द्रोहबुद्धिश्चास्मान्परिवृणक्तु। त्वेषति क्रोधेन ज्वलति त्वेषस्तस्य पचाद्यच्। अघं पापं परस्येच्छति अघा मेहति सिञ्चतीति मीढ्वान् हे मीढ्वः कामाभिवर्षुक, स्थिरा स्थिराणि दृढानि धनूंषि त्वमवतनुष्व अवतारय ज्यारहितानि कुरु। किमर्थं। मघवद्धाः। मघमिति धननाम। मघं हविर्लक्षणं धनं विद्यते येषां ते मघवन्तो

यजमानास्तदर्थम् । यजमानानां भयनिवृत्तये इत्यर्थः। किंच तोकाय पुत्राय तनयाय पौत्राय च मृड पुत्रं पौत्रं च सुखय।

ऋग्वेदे अपि उक्तञ्च **परि णो रुद्रस्यवृज्याः.....**[९] रुद्रस्य महादेवस्य हेतिरायुधं नोऽस्मान्परिवृज्याः। परिवर्जयतु। तथा त्वेषस्य दीप्तस्य रुद्रस्य मही महती दुर्मतिर्दुःखकारिणी बुद्धिश्च परिगात् । अस्मान्वर्जयित्वान्यत्र गच्छतु। हे मीढ्वः सेचनसमर्थ रुद्र स्थिरा स्थिराणि त्वदीयानि धनूंषि मघवद्भ्यो हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्योऽवतनुष्व। अवततज्यानि कुरु। तथा तोकायास्मत्पुत्राय तनयाय तत्पुत्राय च मृळ। सुखं कुरु। **ब्रह्मणो हेते तपशश्च हेते मेन्या मेनिरसि।**[10]

अत्र अथर्वण अस्त्र विषये अथर्वणः ऋषिर्वदति अस्य अस्त्रविशेषस्य प्रयोगः हिंसक पशूनां कृते भवति । अस्य अस्त्रस्य पशुसंयमनार्थमपि भवति। उक्तञ्च यथा **न संयमो न वियमो आथर्वणमसि व्याघ्रजम्भनम् ।**[11] अस्मिन्नेवेदे वरुणास्त्र (वरुण पाश) नाम्नः अस्त्रविशेषस्योल्लेखः वर्तते। शस्त्रस्यास्य प्रयोगः दुष्टानां शत्रूणाञ्च वधार्थं प्रयोगाय कल्पते। **अभ्येनं वज्र आयसः सहस्त्रभृष्टिः......।**[12] वज्रविशेषस्य अस्त्रस्य युद्धे प्रयोगाय ऋग्वेदे बहुत्र दरिदृश्यते। **ये ते पाशा वरुण सप्त सप्त।**[13] सम्मोहनास्त्र-अस्य अस्त्र विशेषस्य प्रयोगः शत्रूणां सम्मोहनाय मारणाय भवति। यथा - **अग्निः स सेनां मोहयतु परेषां निर्हस्ताञ्च कृणवत् ।**[14]

चतुर्ष्वपि वेदेषु तामस अस्त्रविशेषस्य प्रयोगः भवति। अस्य नामान्तरं लोके इत्युच्यते। उक्तञ्च यथा **तां विध्यत तमसापव्रतेन, यथैषामन्यो अन्यं न जानात् ।**[15] अथर्ववेदे आवश्यकतानुसारं प्रकोष्ठद्वयात्मकप्रभृतिः दशप्रकोष्ठात्मकस्य गृहस्य निर्देशः दृश्यते। या द्विपक्षा, चतुष्पक्षा अष्टपक्षां दशपक्षां शालाम् । तथापि आदर्शगृहे निम्नलिखिताः प्रकोष्ठाः भवेयुः।

**हविर्धानमग्निशालं पत्नीनां सदनं सदः।**
**सदो देवानामसि देवि शाले॥**
**इन्द्र त्रिधातु शरणं त्रिरुथं स्वस्तिमत् छदिर्यच्छ मघवद्भ्यः।**[16]

अथर्ववेदे च लौहनिर्मित नगरस्य वर्णनं वर्तते। **परः कृणुध्वम् आयसीरधृष्टाः।**[14] उपमितां प्रतिमितामथो परिमितामुत शलाया विश्ववाराया नद्धानि विवृतामसि। उपमानस्य निर्माणं विदुषा एवं कुर्यात् । अग्निपुराणेऽपि उक्तं विद्यते -

**यन्त्रमुक्तं पाणिमुक्तं मुक्तसंधारितं तथा।**
**अमुक्तं बाहुयुद्धं च पञ्चधा तत् प्रकीर्तितम् ॥**[17]
**ब्रह्मणा शालां निर्मितां कविभिर्निर्मितां मिताम् ।**[18]

अथर्ववेदस्य शालासूक्ते गृहनिर्माणं प्रकोष्ठनिर्माणं द्वाराणां निर्माणं वातायनञ्च उत्कृष्टरूपेण कृतमस्ति। प्रासादस्यान्तः व्यवस्था वैदिसंहितासु नैकस्थलेषु भवनस्य अन्तर्व्यस्थायाः सज्जायाश्च संकेताः समुपलभ्यन्ते। धनुर्विषये यजुर्वेदे उक्तञ्च यथा **तपसे कौलालं मामायै कर्मारं रुपाय मणिकारं।**[19] तपसे कौलालं कुलालापत्यम् मायायै कर्मारं लोहकारम्, रुपाक्रमणिकारं रत्नकर्तारम्, शुभे शुभाय वपं बीजवप्तारम्, शरव्यायै इषुकारं वाणकर्तारम् , हैत्यै धनुष्कारं चापकारिणम् , कर्मणे ज्याकारं प्रत्यञ्चनकर्तारम् , दिष्टाय रज्जुसर्जं रज्जोः स्रष्टारं निर्मातारम्, मृत्यवे मृगयुं मृगग्राहम् , अन्तकाय श्वनिनं शुनो नेतारम् । य धनुर्निर्मां करोति तस्य कृते धनुर्कारः शब्दस्य प्रयोगः क्रियते। यः इषुन्निर्माति तस्य कृते इषुकारः तथा यः प्रत्यञ्चा निर्माति तस्य कृते ज्याकारः।

ऋग्वेदे कृपणनामकमस्त्र विषये वर्णनम् अस्ति तस्मिन् समये इन्द्रः स्व सैन्याय इदमस्त्रविशेषम् अददत् । **चोदयो नृन् कार्पाणे शूर वज्रिवः।**[21] वज्रिवः वज्रधर शूर इन्द्र त्वं कार्पाणे। असिः कृपाणः। तेन साध्यं युद्धं कार्पाणम् । तस्मिन् वृत्रहत्ये शत्रुहननार्थं नृन् नरान् तान् प्रसिद्धान् मरुद्गणान् चोदयः चोदयसि प्रेरयसि। यदि यदा त्वं कवीनां मेधाविनां नक्षत्रशवसां देवान् प्रतिगच्छत्स्तोतृबलानां विशां स्तोतृजनानां संबन्धीनि गुहा गूढानि गुणैः संवृतानि स्तोत्राणि शृणोषीति शेषः।

अथर्ववेदे ब्रह्मनामकस्य आसन्दिकायाः उल्लेखो विद्यते सा अत्यन्त सुखदायिनि आसीत् । वधू श्रान्त्यनन्तरं तस्या उपयोगः करोतिस्म। शूल्ब सूत्राणां प्रमुख विषयः एवास्ति। वेदिनिर्माणं तत्रापि भवन निर्माणस्य वैदिककालीन शिल्पविज्ञानस्य च उत्कृष्टता विद्यते।

ऋग्वेदे - **वज्रेण खानि अतृणन् नदीनाम् ।**[22] अस्मिन् मन्त्रे वज्रविशेषस्य अस्त्रस्य केन कया कदा च प्रयोक्तव्याः इति निर्दिष्टमस्ति। सद्मेव यथा यज्ञगृहान्मानैः षट्त्रिंशत्प्रक्रमप्राचीत्येवंरूपैः परिमाणैः प्राक्प्रवणान् कुर्वन्वति तद्वत सिंधून लोकान्वानृजून्वा मानैः परिमाणैः प्राचः प्राङ्मुखान्विमिमाय। इंद्रो विशेषेण निर्मितवान् । तथा नदीनां खानि निर्गमनद्वाराणि वज्रेण चातृणत् ।

**वास्तुशास्त्रम् (Architecture)**

ऋग्वेदे अथर्ववेदे स्थापत्यकलायाः सम्बद्धान् केचन मन्त्रा विद्यन्ते। येषु तस्मिन् कालिकान् शिल्पव्यवस्थायाः ज्ञानं वरिवर्ति। ऋग्वेदे वर्णितम् मित्रवरुणयोः राजद्वारे सहस्त्र स्तम्भा आसन् - **राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्त्रस्थूण आसाते॥**[23] राजानौ ईश्वरौ दीप्यमानौ वा अनभिद्रुहा अनभिद्रोग्धारौ यौ मित्रावरुणौ ध्रुवे स्थिरे उत्तमे उत्कृष्टे सहस्त्रस्थूणे बहुस्तंभे सदसिस्थाने आसते उपविशतः तावागच्छतमितिशेषः। बृहत्संहितायामुक्तम् वज्रस्य कृते -

**गोमहिषा जविषाणैः खररोम्णां महिषचर्म गव्यैश्च।**
**निम्बक पित्थरसैः सह वज्रतलो नाम कोल्कोन्यः॥**[24]

**उपसंहारः**

अत्र कथयामः वयं यत् चतुर्ष्वपि वेदेषु शिल्पविज्ञानस्य चर्चा प्रामुख्येन स्वस्थानं भजते । वेदेष्वपि वह्वीनां शिल्पकलायाः वर्णनं मिलति। आधुनिकयुगे शिल्पकला वेदादेव समागता इत्यपि अनेन अनुमीतये।

**यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद।**
**यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो**
**यमत्येष आत्मान्तर्याम्यमृतः॥**[25]

**सन्दर्भाः**


1. तै.सं.भा. भू. पृ. 18, ऋग्वेदादिभाष्यभूमिका दयानन्दसरस्वति, डॉ. रामप्रकाश वर्णी, आर्यसाहित्य प्रचारट्रष्ट, दिल्ली 2008
2. आचार्य मनुः मनुस्मृति 2.6, व्याख्याकारः पं. हरगोविन्द शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 1995
3. History of Indian literature pp. 47/48 by Maurice winternitz
4. पतञ्जलिः महाभाष्यम् 1 (पस्पशाह्निक), रमण कुमार शर्मा, इष्टर्न बुक लिंकर्स, देहली, 1998
5. ऋग्वेदादिभाष्यभूमिका, पृ. 7, दयानन्दसरस्वति, डॉ. रामप्रकाश वर्णी, आर्यसाहित्यप्रचारट्रष्ट, दिल्ली, 2000
6. आचार्य मनुः मनुस्मृति, 2.6, व्याख्याकारः पं. हरगोविन्द शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 1995
7. आचार्य मनुः मनुस्मृति, 1,121, व्याख्याकारः पं. हरगोविन्द शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 1995
8. शुक्ल यजुर्वेद, 16.50
9. ऋग्वेदः 2.33.14
10. अथर्ववेदः 5.6.9
11. अथर्ववेदः 4.3.7
12. ऋग्वेदः 1.80.12
13. अथर्ववेदः 4.16.6
14. अथर्ववेदः 6.1.1
15. अथर्ववेदः 3.2.6
16. अथर्ववेद 19.58.4
17. अथर्ववेद 19.58.5

18. अग्निपुराण 248,2 अनुवादकः तारिणीश झा एवं घनस्याम त्रिपाठी, हिन्दी साहित्य सम्मेलन प्रयाग, 2018
19. अथर्ववेद
20. शुक्ल यजुर्वेद 30.7
21. ऋग्वेद 10.22.10
22. ऋग्वेद 2.15.3
23. ऋग्वेदः 2.41.5
24. वाराहमिहिरः बृहत्संहिता 6. श्री अच्युतानन्द झा चौखम्बा विद्याभवन वाराणसी, 2002
25. बृहदारण्यकोपनिषद 2.26 शाङ्करभाष्यम् गीताप्रेस, गोरखपुर, 2010

**सहायकग्रन्थाः**

1. पतञ्जलिः महाभाष्यम् 1 (पस्पशाह्निक), रमण कुमार शर्मा, इष्टर्न बुक लिंकर्स, देहली, 1998
2. सिद्धान्तकौमुदी भट्टोजिदीक्षितः, व्याख्याकारः गोविन्दाचार्यः, चौखम्बासुरभारती प्रकाशन, वाराणसी, 2020
3. मनुस्मृतिः आचार्यमनु, व्याख्याकारः पं. हरगोविन्द शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 1995
4. History of Indian Literature by Maurice winternitz 1980
5. निरुक्तम् , यास्क, छज्जूरामशास्त्री, मेहरचन्द लक्ष्मणदास पब्लिकेशन, दिल्ली 2016
6. ऋग्वेदः, सायणभाष्यम, सम्पादकः श्रीरामशर्मा, ब्रह्मवर्चस शान्तिकुञ्ज हरिद्वार, उत्तरप्रदेशः, 2002
7. शुक्लयजुर्वेदः, महीधरभाष्यम् , सम्पादकः रामकृष्णशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2001
8. बृहदारयकोपनिषद् शाङ्करभाष्यम् गीताप्रेस, गोरखपुर, 2010
9. व्याकरणमहाभाष्यम् पतञ्जलिः, व्याख्याकारः युधिष्ठिरमीमांसकः चौखम्बासुरभारती प्रकाशन, वाराणसी, 2005
10. ऋग्वेदादिभाष्यभूमिका दयानन्दसरस्वति, डॉ. रामप्रकाश वर्णी, आर्यसाहित्यप्रचारट्रष्ट दिल्ली, 2008
11. शतपथब्राह्मणम्, सायणाचार्य वेदार्थप्रकाशः, प्रो. युगलकिशोरमिश्रः, सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः 2017
12. अग्निपुराण अनुवादकः, तारिणीश झा एवं घनस्याम त्रिपाठी, हिन्दी साहित्य सम्मेलन प्रयाग 2018
13. वाराहमिहिरः बृहत्संहिता श्री अच्युतानन्द झा चौखम्बा विद्याभवन वाराणसी, 2002
14. बृहदारण्यकोपनिषद् शाङ्करभाष्यम् गीताप्रेस, गोरखपुर, 2010
15. अथर्ववेदः, सायणाचार्यभाष्य, श्रीरामशर्मा, ब्रह्मवर्चस शान्तिकुञ्ज हरिद्वार, उत्तराखण्ड, 2002

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# वास्तुशास्त्रदृष्ट्या बहुतलीयावासीयभवनेषु कक्षविन्यासः

**विनयकुकरेती* डॉ. देशबन्धुः****

**सारांशः -** प्रस्तुते शोधपत्रे भारतीयवास्तुशास्त्रे वर्णितानां गृहनिर्माणस्य विविधा सिद्धान्ता वर्तमानदृष्ट्या प्रस्तुता सन्ति। वर्तमानकाले प्राचीनवास्तुशास्त्रस्य नियमानुसारं बहुतलीयावासीयभवनानां निर्माणमपि कर्तुं शक्यते। प्राचीनकाले स्थानस्य प्रचुरतायां न्यूजनसंख्यायाः च कारणात् वास्तुशास्त्रस्य षोडशकक्षविनयासस्य सिद्धान्तः सम्यक् प्रतीयते स्म। अद्यतनमहानगरीय-जीवनशैल्यां तद्विपरीतम् अभवत्, अतः षोडशकक्षस्य सिद्धान्ते केचन परिवर्तनानि आवश्यकानि सन्ति। अथास्मिन् दिशां विदिशां वा मध्ये षोडशकक्षाणां भेदः प्रदर्शिता वर्तते। येषां निर्माणं यथादिशं यदि क्रियते तदा वास्तुशास्त्रोक्तं फलं तत्रत्या मानवा अथवा गृहपतिरुभावपि प्राप्नुत। प्राचीनकाले वास्तुमते गृहनिर्माणार्थं षोडशकक्षाणाां निर्माणमनिवार्यमासीत्, परञ्च वर्तमानकाले केवलं चत्वारि कक्षाः पर्याप्ताः भासते। स्थानस्य अल्पतायाः कारणात् बहुतलीयभवनानां निर्माणं कक्षाणां न्यूनीकरणं च आवश्यकं सिद्ध्यति। वस्तुतः षोडश कक्षाः न्यूनीकृताः न सन्ति, परन्तु समयस्य आवश्यकतां दृष्ट्वा भिन्नकक्षाः समाविष्टाः एककक्षरूपेण च उपयुज्यन्ते। तथा स्नानगृहं शौचालयश्च एकस्मिन् कक्षे संयोजितमस्ति। मथनस्थानं घृतस्थानं पाकशाला धान्यभण्डारश्च पाकशालायां एव समाविष्टाः सन्ति।

**कुञ्जीशब्दः -** वास्तुपदविन्यास, महानसम्, शाला, सदनम् , धनागरः, देवस्थानम्, यूनां, औद्योगिकः, शय्या, पुरीषत्यागमन्दिरम्, गृहपति, नवपदवास्तु, संगणकं, महानगरीय, वास्तुपदमण्डलः।

*शोधछात्र, श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृतविश्वविद्यालय, नईदिल्ली
** सहायक प्राध्यापक, श्रीलालबहादुरशास्त्री राष्ट्रीय संस्कृतविश्वविद्यालय, नईदिल्ली

**प्रस्तावना**

वास्तुशब्दस्योत्पत्तिः वस निवासे इत्यमुष्माद्धातोर्भवति। सामान्येनास्यार्थो भवति निवासाय समुचितं स्थानमाहोस्विदेवमपि वक्तुं शक्यत एवम्प्रकारकं स्थानं यत्र वयमादर्शपूर्ण यापयितुं समर्था वर्तामहे। प्राक्कले भारतवर्षे भवननिर्माणसन्दर्भे विस्तृतो दृष्टिकोणोऽवर्तिष्ट। भारतीयार्यसंस्कृत्या जीवानुभूतं तत्त्वं धर्मो वर्तते। वस्तुतो धर्म एव एकमेतादृक्तत्त्वं वर्तते येन मानवपश्वोर्भेदो ज्ञातुं शक्यते। यथा शास्त्रोक्तिषु दृश्यत आहारः, निद्रा, भयं, मैथुनवृत्तिः समेष्वपि प्राणिषु सामान्येन दृग्गोचरी भवतीति परं धर्म एव प्राणवतां मानुषः श्रेष्ठ इति प्रतिपादयति। यथोक्तमाचार्य्यैः **यतोऽभ्युदयनिः श्रेयससिद्धि स धर्मः**[1] कथनमिदमृषीणां श्रेष्ठस्य गौतमस्य वर्तते। आशयो भवति येन कर्मणा मानवस्य निश्रेयसः सिद्धिः स्यात्सोऽसौ धर्मपदवाच्यः। पुरुषार्थचतुष्टयस्य सिद्ध्यै गृहस्थाश्रमसन्दर्भे शुभस्य वास्तोरद्वितीयं योगदानं वर्तते। गृहस्थाश्रमसन्दर्भे भारतीयवाङ्मयेषु विविधानि मतानि दृष्टिपथमायान्ति।[2] वास्तुशास्त्रेऽपि गृहस्थाश्रमस्य वैशिष्ट्यं वर्तते। यतो गृहशब्दस्य साक्षात्सम्बन्धो गृहस्थाश्रमेण वर्तते। **गृहस्थस्य क्रियाः सर्वाः न सिद्ध्यन्ति गृहं विना**[3] एकस्मिन् स्थान एव विविधानां जनानां निवासाय निमित्तभूतानि भवनानि स्युरेतदर्थं बहुतलीयभवनानां निर्माणमारब्धम् । अतोऽत्र चर्चाया विषयो भवति आधुनिककाले प्राक्काले चोभयोः कालयोर्बहुतलीयावासभवनेषु किं परिवर्तनमभवद्यथावश्यकम् इति। बहुषु स्थानेषु तलीयभवनानामपि वर्णनं प्राक्कालिकेषु शास्त्रेष्वक्षिगोचरं भवति। परतन्त्र निर्माणेषु लक्ष्यमिदं नासीद्यन्न्यूनस्य स्थानस्योपयोगनाधिकाधिकजनानामासयोग्यत्वसम्पादनम् तत्र लक्ष्यमासीत् भवननिर्माणेनात्मसन्तोषप्राप्तिः, वैभवतासिद्धिः, सौन्दर्यं, कलात्मकत्वं, दैर्घ्यञ्च। भवननिर्माणं सौन्दर्यसंरक्षणार्थं, कलाया विकासार्थं च क्रियते स्म।

वास्तुशास्त्रीयग्रन्थेषु भवननिर्माणाय षोडशकक्षाणां निर्माणं कृत्वा वास्तुसम्मतं तत्र समानि वस्तूनि निर्मेलिमानीत्यसौ उपदेशो लभ्यते। परमाणुनिकसन्दर्भे सिद्धान्तोऽयं सर्वत्र न प्रमाणीभवति यत उपभोगदृष्ट्यानेकानि वस्तूनि नापेक्ष्यानि वर्तन्ते। वर्तमानदिशा यदि वयमवलोकयामश्चेद् गृहे शयनकक्षः, पाककक्षः, सम्मेलनकक्षः, शौचालयः, स्नानागार इत्येतेषां प्रायेणावश्यकता दृग्गोचरीवर्तते। शौचालयस्य स्नानागारस्याप्येकत्र समाहारो भवत्यतः षोडशकक्षाणां स्थाने साम्प्रतं चतुर्णामेव कक्षाणां प्राधान्यं दृश्यते। वास्तुशास्त्रे यथादिशं कक्षाणां निर्माणं कथं केन प्रकारेण च कर्तव्य इत्येतस्य विषयस्य सङ्केतः श्लोकमाध्यमेनाचार्य्येण प्रस्तुतः।[4] यदमुष्यां पूर्वस्यां दिशि स्नानकक्षस्य निर्माणं कर्तव्यम् आग्नेयकोणे पाकशालायाः निर्माणं प्रशस्तम्, दक्षिणस्यां दिशि शयनकक्षस्य निर्माणं प्रशस्यते, राजभवनस्य निर्माणावसरे नैऋत्यकोणेऽस्त्रसङ्ग्रहालयः, जनसमुदाये

निर्माणाय स्थापितानामस्त्राणां सङ्ग्रहालयः, वस्त्रनिर्माणयन्त्रम्, कृषिकार्यसम्बद्धं वाहनं च स्थापनीयम् । पश्चिमस्यां भोजनकक्षस्य निर्माणं कर्तव्यम्भवति। वायव्यकोणे धान्यसङ्ग्रहणकक्षस्यान्नभण्डारस्य च निर्माणं प्रशस्तम् । उत्तरस्यां दिशि धनसङ्ग्रहालयो निर्मेलिमो यतोऽस्या दिशोऽधिपतिः कुबेरो भवति।[5] **पूर्वस्यां श्रीगृहं प्रोक्तमाग्नेय्यां स्थान्महानसम्.....कारयेदेवं क्रमादुक्तानि षोढश।**[6]

वा. उ. ई.

| | | | | |
|---|---|---|---|---|
| धान्यभण्डारगृहम् | रतिगृहम् | भण्डारगृहम् | औषधीकक्षः | देवगृहम् |
| रोदनकक्षः | | | | सर्ववस्तुसंग्रहः |
| भोजनकक्षः | | | | स्नानगृहम् |
| विद्यास्थानम् | | | | दधिमथनम् |
| शास्त्रागारः | शौचालयः | शयनकक्षः | घृतस्थानम् | पाकशाला |

प. पू.

नै. द. आ.

सम्प्रति न केवलं नगरेषु महानगरेषु वा बहुतलीयभवननिर्माणस्य परम्परा प्रचलिता वर्ततेऽपित्वियं परम्परा ग्रामीणेषु भवननिर्माणेष्वप्यधिकमात्रायां दृष्टिपथमवतरति। बहुतलीयभवनेष्वनेकेषां जनानामावासव्यवस्था भवति तथा च न्यूनभूमावप्यधिकतरं निर्माणं जनवासनिमित्तं व्यावसायिकप्रकोष्ठनिर्माणनिमित्तं च कर्तुं शक्यते। अत आधुनिककाले बहुतलीयभवनानाम्महत्त्वं सामान्यभवनादधिकं वर्तते। वर्तमानकाले षोडशकक्षाणां निर्माणव्यवस्था प्रायेण समाप्तिं गच्छन्ती वर्तते तथास्या व्यवस्थायाः स्थाने 1BHK, 2BHK, 3BHK, 4BHK, इत्येषा व्यवस्था लोकपरम्परायां दृश्यते। BHK शब्दस्यार्थो भवति शयनकक्षः, सम्मेलनकक्षः, पाककक्षःशौचालयः। आशयो वर्तते इत्यस्यैकः शयनकक्षः, पाककक्षः, सम्मेलनकक्षः शौचालयश्च। क्रमेऽस्मिन्नवधेयमिदं वर्तते सङ्ख्यावृद्धया साकं शयनकक्षवृद्धिर्भवतीति।

**उ.**

| | | |
|---|---|---|
| भण्डारगृहम् | कोषागारः | मन्दिरम् |
| भोजनकक्षः, शयनकक्षः | रिक्तस्थानम् | अध्ययनकक्षः (बालकानां) |
| शयनकक्षः | शयनकक्षः | पाकशाला |

प्रस्तुतमिदं वस्तुतः षोडक्षककक्षाणामेव संक्षेपरूपं वर्तते। एवम्प्रकारेण षोडशकक्षाणां स्थाने चतुर्ण्णां कक्षाणां निर्माणमाधुनिककाले दृश्यते स्थानाभावात्। शोधपत्रस्यामुष्य शीर्षको भवति बहुतलीयावाससन्दर्भे कक्षविन्यासः। दिशो ज्ञानाभावे कक्षाणां सम्यङ्निर्माणाभावो भवतीति वस्तुस्थितिः। अतः सूक्ष्मरूपेण दिशो दिशो ज्ञानाय सारणी अत्र प्रस्तूतये। हानिर्न स्यात्केनापि निर्माणेनैतदर्थमस्माभिर्दिक्शोानमवश्यमेव कर्तव्यम् । दिक्शुद्धिरहितं गेहं प्रासादो वा जलाशयः, कुर्याद्धानिं मृतिं तस्मादादौ दिक्शोधनं चेरत् ।।[7] वास्तुशास्त्रे दिक्शोधनाय शङ्कुस्थापनाया विधेरपि विशदतया वर्णितं वर्तते।[8]

| क्र. | डिग्री | दिशा | सङ्केताक्षरम् | देवता | वास्तौ देवता |
|---|---|---|---|---|---|
| 1 | $0^0$ | उत्तर | उ | बुधः | कुबेरः |
| 2 | $45^0$ | ईशान्य | ई | गुरुः | ईशः |
| 3 | $90^0$ | पूर्व | पू | सूर्यः | सूर्यः |
| 4 | $135^0$ | आग्नेय | आ | शुक्रः | वह्निः |
| 5 | $180^0$ | दक्षिण | द | मङ्गलः | यम |
| 6 | $225^0$ | नैरऋत्य | नै | राहुः | पितृ |
| 7 | $270^0$ | पश्चिम | प | शनिः | वरुण |
| 8 | $315^0$ | वायव्य | वा | चन्द्रः | रोग |

1. **शयनकक्षः -**[9] प्रत्येक मानवः प्रायेण प्रत्यहं दिनस्याधिकतरं समयं शयनकक्षे यापयतीति वस्तुस्थितिः। अतोऽस्य निर्माणे गृहवास्तौ वा स्थानं महत्त्वपूर्णं वास्तुविद्धिः स्वीकृतम् । बहुतलीयावासभवने गृहस्थानां कृते शयनकक्षस्य पृथक्पृथग्व्यवस्था भवति। यथोक्तमाचार्य्यैः **शयनं दक्षिणस्यां च।**[10] परं गृहे यदि बहूनां शयनकक्षाणां निर्माणं कर्तव्यं तदासौ विषयः न यथायथमुपतिष्ठते। शयनकक्षणां विभागः प्राधान्येन चतुर्धा कर्तुं शक्यते प्रौढजनानां शयनकक्षः, यूनां/दम्पतीनां शयनकक्षः, शिशूनां शयनकक्षः, अतिथीनां शयनकक्षः।

**प्रौढजनानां शयनकक्षः -** भारतीयपरम्परायां जीवनशैल्यां वा गृहाणि तानि भवन्ति यत्र गृहे पितामहप्रपितामहादयः प्रौढजना मार्गनिर्देशकत्वेन स्युः। अत एतेषां गृहप्रौढानां शयनकक्षस्य व्यवस्था दक्षिणस्यां दिश्याहोस्विन्नैर्ऋत्यकोणे भवेत् । यदि वास्तुशास्त्रसम्मता प्रौढशयनकक्षव्यवस्था क्रियते तदा सर्वेऽपि जना प्रौढजनानामाज्ञानुसरणशीला भवन्ति तथा गृहे कलहाभावो भवति।

**यूनां/नवदम्पतीनां शयनकक्षः -** यूनां कृते दम्पीतनां वा कृते वास्तुशास्त्रमतेन शयनकक्षः पश्चिमस्यां दिशि, दक्षिणस्यां दिशि, उत्तरस्यां दिशि, उत्तरवायव्ययोर्मध्ये वा भवेत् । **कामोपभोगशमनं वायव्योत्तरयोर्गृहम्** [11] वास्तुशास्त्रसम्मतेन शयनकक्षेण प्रगतिः, नवासराणामुपस्थितिः, सुखान्यथ प्रेमभावो वर्धन्ते।

**शिशूनां शयनकक्षः -** भविष्यकाले विविधविधक्षेत्रेषु परिवारस्य प्रतिष्ठाधायका मानवर्धका भवन्ति। अत एतेषां शिशूनां शारीरिकविकासो, मानसिकविकास, आध्यात्मिकविकासश्चापेक्ष्यते। शिशूनां शयनकक्षः परिश्चमस्यां दिशि, उत्तरस्यां दिशि, पूर्वस्यां दिशि वा भवेत् । शिशूनामध्ययनकक्षः पश्चिमस्यां दिशि वास्तुविद्भिः प्रशस्तः।

**अतिथीनां शयनकक्षः -** भारतीयपरम्परायामतिथिरसौ देवतुल्यो निगद्यते। **'अतिथिदेवो भव'**[12] परमद्यत्वे बहुतलीयावासभवनानां सन्दर्भे विचारयामश्चेत् समयाभावात् स्थानाभावाच्च अतिथीनां शयनकक्षो वायव्यकोणे प्रशस्यते। वायव्यक्षेत्रं वायुदेवताया निगदितं वायुश्च सर्वदैव गतिमान् वर्ततेऽतोऽतिथीनां शयनकक्षो वायव्यकोणे वास्तुविद्भिः प्रशस्तः।




क. शयनकक्षे शय्या दक्षिणस्यां दिशि भवेत् । अथ चात्र ध्येयमिदमपि भवति शयनकाले मानवस्य शिरः पूर्वस्यं दिशि आहोस्वित् दक्षिणस्यां दिशि भवेत् ।

ख. शयनकक्षे प्रवेशद्वारं पूर्वस्यां दिशि तथा चोत्तरस्यां दिशि भवेत् तथा च गवाक्षाणां निर्माणमपि पूर्वोत्तरयोर्दिशोर्भवेत् शयनकक्षे दक्षिणस्यां दिशि गवाक्षा द्वारं च कथमपि न स्युः।

ग. शयनकक्षे वस्त्राणां कृते तथान्येषामपि वस्तूनां कृते वस्तुनोः सङ्ग्रहणाय सङ्ग्रहालयः पश्चिमस्यां दिशि, नैर्ऋत्यकोणे, दक्षिणस्यां दिशि स्थापनीयः।

घ. शयनकक्षेऽलङ्कृता बहुमूल्यानामाभूषणानां धनस्य वा सङ्ग्रहालयः पश्चिमस्यां दिशि भित्तौ, दक्षिणस्यां दिशि भित्तौ वा भवेत् ।

ङ. शयनकक्षे शौचालस्य निर्माणं यदि प्रकोष्ठ एव कर्तव्यं तदा पश्चिमस्यां दिशि, उत्तरस्यां च दिशि कर्तव्यम् ।

च. शयनकक्षे यदि दृश्यश्रव्योपयोगिनां वस्तूनां प्रौद्योगिकानां वोपस्थानं कर्तव्यं तदास्माभिः आग्नेयकोणस्य चयनं कर्तव्यम् ।

छ. शयनकक्षे यदि वातानुकूलितानां पदार्थानामुपस्थापनं कर्तव्यं तदा पश्चिमस्यां दिशि, वायव्यकोण, उत्तरस्यां च दिशि कर्तव्यम् ।

ज. शयनकक्षे देवालयस्य निर्माणं न कर्तव्यं तथा च शय्याया उपरि कस्यापि देवस्य चित्रं विग्रहो वा न भवेत् ।भीत्युत्पादकानि चित्राण्यति शयनकक्षे न स्थापनीयानि।

**2. पाककक्षः -**[13] पाकशाला समस्तस्यापि भवनस्य महत्त्वपूर्णमङ्गं भवति। पाकशालायां निर्मितमेव भोजनं सर्वेऽपि सदस्याः स्वीकुर्वते। गृहस्वामिन्या अधिकः समयः पाकशालायां गच्छतीति। यतोऽन्नस्य साक्षात् सम्बन्धो मानवस्य शरीरेण मनसा वा वर्तते। अतो दूरदर्शिभिर्महर्भिभरुक्तमस्ति **अन्न ब्रह्मा रसो विष्णुः भोक्ता देवो महेश्वरः**[14] तैत्तिरीयोपनिषद्यप्यन्नस्य महत्त्वमृषिभिः प्रतिपादितम् । **अन्नं ब्रह्मेति व्यजानपात्**[15] भोजननिर्माणायोग्नेयकोणः प्रशस्तः। **आग्नेय्यां स्यान्महानसम् ।**[16] इत्येवम्प्रकारेण पाकशालाया आग्नेयकोणे पश्चिमस्यां दिशि, व्याव्यकोणे, उत्तरस्यां दिशि वा निर्माणं कर्तव्यम् ।




क. पाकशालाया निर्माणमाग्नेयकोणे सर्वोत्तमं भवति। स्थानाभावे सति पश्चिमस्यां दिशि, वायव्यकोणेऽथ पूर्वस्यां दिश्यपि पाकशालाया निर्माणं कर्तुं शक्यं वर्तते।

ख. पाकशालाया ब्रह्मस्थलो रिक्तो भवेत् तथा भूमेरवनतिरुत्तरस्यां दिशीशानकोणे च स्यात्।

ग. पाकशालयां पाकयन्त्रं पाकसम्बद्धानि यन्त्राण्याग्नेयकोणे स्थापनीयानि। सर्वदैव ध्येयमिदम्भवति गृहिण्याः पाकशालायाश्च मुखं पूर्वस्यां दिशि भवेत् पाकक्रियावसरे।

घ. पाकशालायां पात्रप्रक्षालनाय स्थानमुत्तरस्यां दिशि भवेदाहोस्विदीशानकोणे भवेदियं दिग्जलाय प्रशस्यतेऽतो जलस्यागमनपीशानकोणे भवेत् ।

ङ. पाकशालायां पाकवस्तुसङ्ग्रहणाय सङ् ग्रहालयो नैर्ऋत्यकोणे, पश्चिमस्यां दिशि, दक्षिणस्यां दिशि, वायव्यकोणे च भवेत् ।

च. पाकशालायां यथर्तुं स्थापनीयानां वस्तूनाम् (फ्रिजादीनां) उपस्थानं भोजनसासन्दिकानां व्यवस्थापनं वा पश्चिमस्यां दिशि स्यात् ।

छ. पाकशालायाः प्रवेशद्वारमुत्तरस्यां दिशि अथवा पश्चिस्यां दिशि आचार्य्यैः प्रशस्तं वर्तते। गवाक्षाणां पाकशालायाः पूर्वस्यां दिशि, उत्तरस्यां दिशि, पश्चिमस्यां वा दिशि प्रशस्तं वर्तते।

ज. पाकशालायां खाद्यवस्तूनि वायव्यकोणेऽथवा पश्चिमदक्षिणयोर्दिशोः प्रशस्यन्ते। एवमेव चूर्णीकर्तुं येषां वस्तूनां यन्त्राणां वा उपयोगो भवति तानि यन्त्राणि (चक्की, पोस्टर, मिक्सी) वायव्यकोणे स्थापनीयानि।

झ. ईशानकोणेऽथ नैर्ऋत्कोणे पाकशालाया निर्माणं कदापि न कर्तव्यम्भवति। यद्येतयोः कोण्योः पाकशालया निर्माणं क्रियते चेद् गृहेऽशान्तिः, व्ययवृद्धिर्धनहानिस्तथा वह्निजन्या दुर्घटनापि भवितुं शक्या।

**3. पूजनकक्षः-**[17] पूजनकक्षे गहे सर्वोत्तकृष्टकक्षो भवति तथा चोर्जस आधायकोऽपि भवति। पूजाकक्षो धर्मदृष्ट्या, जातिदृष्ट्या, उपासनापद्धतिदृष्ट्या वा पृथक् पृथक् निर्मातुं शक्यो वर्तते। विशेषपरिस्थितौ यज्ञाय, कथायै, उपासनायै च ब्रह्मस्थलस्योपयोगः सम्भवति। यथा प्राक्काले गृहस्य मध्ये अग्रे वा रिक्तस्थानम् (आगन) अभवत् । अथ चास्मिन् स्थाने वृन्दाया वृक्षोऽभवत् । **ऐशान्यां देवतागृहं।**[18] ईशानकोणोऽसौ प्रातः दिनकरस्य रश्मिभिः पवित्रीकृतो वर्तेऽतोप्यस्य पृथगेव वैशिष्ट्यं वर्ततेऽथ च सूर्यस्य रश्मिभिरनेके रोगाः प्रणश्यन्तीत्यपि वस्तुस्थितिरतोऽस्य कोणस्य वैशिष्ट्य पूजाकक्षनिर्माणावसरे वर्तते। पूजनकक्षस्यादर्शत्वमधिगन्तुं केचन बिन्दवो प्रस्तूयन्ते।




क. पूजनकक्षस्य निर्माणं यथाशक्यमीशानकोणे भवेत्तथा च स्थानाभावे सत्युत्तरस्यां दिशि पूर्वस्यामपि पूजाकक्षस्य निर्माणं कर्तुं शक्यते।

ख. पूजनकक्षे देवानां देवीनां वा विग्रहः चित्रं वा उत्तरस्यां दिशि, पूर्वस्यां दिशि वा भित्तौ भवेत् । पितृणामाचार्याणां चित्रं दक्षिणस्यां दिशि भित्तौ भवेत् ।

ग. पूजाकक्षे पूजाकर्तुर्मुखं पूर्वस्यां दिशि, उत्तरस्यां दिशि वा भवेत् ।

घ. पूजाकक्षस्य छदसः (छत) निर्माणं पिरामिडाकृतिमधिकृत्य कर्तव्यमनेन ऊर्जस्विनो वयं भवामः।

ङ. पूजनकक्षे यज्ञवेदि, अग्निः, दीपश्च आग्नेयकोण भवेयुः।

**4. शौचालयः -** [19] प्राचीनकाले सूर्योदयात्प्रागेव जना उत्थाय नगराद्बहिर्गत्वा कुर्वन्ति स्म शौचकर्माणि। वास्तुशास्त्रे स्नानस्य शौच्य च स्थानं भिन्नं भिन्नं कीर्तितं परमद्यत्वे स्थानाभावाद् द्वयोरेकत्रैव समाहोरा दृश्यते। **यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम् ।**[20] इत्येवम्प्रकारेण शौचालयस्य उपयुक्तं स्थानं दक्षिणनैर्ऋत्योर्मध्ये प्रशस्तं वर्तते। परं स्थानाभावेऽपि शौचालयस्याधिक्यमपेक्षते चेत् पश्चिमवायव्योर्मध्ये शौचालस्य निर्माणं कर्तुं शक्यते। इतोऽपि वायव्योत्तरयोर्मध्ये निर्मातुं शक्यते। यतः प्रातः काले स्नानावसरे दिनकरस्य रश्मिःशरीरे आपतति शरीरस्य पुष्ट्यै सूर्यरश्मिः प्रशस्तो वर्तते।

**उदङ्मुखो दिवा मूत्रं विपरीतमुखो दिशि।**
**दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः,**
**कुर्यान्मूत्रपुरीषे तु रात्रौ च दक्षिणमुखः।।**[21]

अद्यत्वे पूर्णसुविधायुक्तानां शौचालयनां स्नानागराणां वा निर्माणं जायमानं वर्तते। भवने शयनकक्षेण साकं संयुक्तस्य शौचालयस्य निर्माणं सुविधादृष्ट्या प्रशस्तं वर्तते।

संयुक्तस्य शौचालयस्य स्नानागारस्य वान्तरिकसज्ञापि वास्तुशास्त्रसम्मतमुरीकृत्य कर्तुं शक्या भवति।




क. स्नानागारस्य कृते पूर्वा दिक्, उत्तरा दिक् , वायव्यकोणश्च प्रशस्ता वर्तन्ते। स्नानागारस्य निर्माण ब्रह्मस्थल न कर्तव्यम् ।

ख. स्नानागारे स्नानार्थं पूर्वस्यां दिशि, उत्तरस्यां दिशि च भित्तौ स्थानं निर्माणव्यम् ।

ग. स्नानाय जलसंग्रहपात्राणामुपयोगः कर्तव्यश्चेत् ईशानकोण विरहय्य उत्तरस्यां दिशि कर्तव्यो भवति।

घ. स्नानागारे जलस्योष्णकारकयन्त्राणामुपस्थापनमाग्नेयकोणे शुभं भवति।

ङ. स्नानागारे यदि शौचाय स्थानं निर्माणतव्यं तदा दक्षिणनैर्ऋत्ययोर्मध्ये निर्मातव्यम् ।

च. पूर्वस्यां दिशि गवाक्षः किञ्चिदुपरि उत्थाय उद्घाटनीयः। यतः प्रातः सूर्योदयसमये सूर्यस्य रश्मीनां समागमो भवेत् ।

छ. वस्त्रादीनाम्प्रक्षालनाय वायव्यकोणे स्थानं भवेत् । वस्त्रप्रक्षालनयन्त्रस्याप्यत्रैवोपस्थपनं कर्तव्यम् । उत्तरस्यां दिशि दर्पणस्य व्यवस्था स्यात् ।

ज. शौचालस्य निर्माणं नैर्ऋत्यदक्षिणयोर्मध्ये प्रशस्यते। स्थानाभावे सति शौचालयस्यावश्यकतायां पश्चिमोत्तरयोः दिशोर्वायव्यकोणस्य समीपे शौचालयस्य निर्माणं कर्तुं शक्यते।

झ. शौचालये मलमूत्रत्यागावसरे मानवस्य मुखमुत्तरसं दिशि दक्षिणस्यां वा दिशि भवेत् । शौचालये बहुमूल्यपाषाणानामुपयोगो यथायत्नं न भवेत् ।

ञ. शौचत्यागस्थानस्य निर्माणं नैर्ऋत्यपश्चिमयोर्मध्ये प्रशस्यते। जलस्य नलिकादीनां निर्माणं पश्चिमस्यां दिशि भवेदथवा ईशानकोणे भवेत् हस्तप्रखालनाय स्थानं पूर्वस्यां दिशि, उत्तरस्यां वा दिशि भवेत् ।

ट. पूर्वस्यां दिशि निर्मिते कक्षे शौचालयो दक्षिणस्यां दिशि निर्मातुं शक्यते।

ठ. दक्षिणस्यां दिशि निर्मिते कक्षे शौचालयः पश्चिमोत्तरयोर्दिशोनिर्मर्तातुं शक्यते।

ड़. पश्चिमस्यां दिशि निर्मिते कक्षे शौचालयो वायव्यकोणस्य समीप उत्तरस्यां दिशि दक्षिणस्यां वा दिशि भवेत।

ढ़. उत्तरस्यां दिशि निर्मिते कक्षे शौचालयः पश्चिमस्यां दिशि दक्षिणस्यां दिशि आहोस्वित् नैर्ऋत्यकोणे भवेत् ।

**5. स्वागतकक्षः -** [22] अद्यत्वे भवने स्वागतकक्षो भवनस्य महत्त्वपूर्णमङ्गं भवति। कक्षोऽसौ यथाशक्यं बहुमूल्यानां पदार्थानां संयोजनेन जनैरलङ्क्रियते। सामान्येन गृहसम्बद्धा निर्णया वार्तालापादीनि कर्माण्यत्रेव कक्षे सम्पद्यन्तेऽतोऽस्य महत्त्वं द्विगुणितं

भवति।[23] स्वागतकक्षस्य सज्जा गृहपतेः कार्याधारिता भवतीति वस्तुस्थितिः। यन्मिन् कर्मणि गृहपतिः संलग्नो भवति तदनुरूपं स्वागतकक्षस्य सौन्दर्यीकरणं भवति। वास्तुशास्त्रस्योद्देश्यं मनुष्याय पृथ्व्यां प्रकृतिब्रह्माण्डयोः चुम्बकीयक्षेत्रस्य गुरुत्वाकर्षणस्य च प्रभावस्य लागभप्रदानं वर्तते साकमेव विविधविधदेवानाम्प्रसन्नतासिद्धिरस्ति। नवपदवास्तुमण्डलानुसारं स्वागतकक्षस्य निर्माणं पूर्वस्यां दिशि उत्तरस्यां दिशि वा कर्तव्यं भवति। यथावश्यकं दक्षिणस्यां दिशि अथवा पश्चिमस्यां दिशि निर्माणं कर्तुं शक्यते स्वागतकक्षस्य।




क. स्वागतकक्षो भवनस्य प्रवेशद्वारस्य समीपे भवेत् । विशिष्ट स्वागतकक्षः पूर्वस्यां दिशि, उत्तरस्यां दिशि वावव्यकोणे च भवेत् ।

ख. स्वागतकक्षे आसन्दिकानां व्यवस्था पश्चिमस्यां दिशि, दक्षिणस्यां वा दिशि भवेत् ।

ग. स्वागतकक्षे सज्जाया हुभारवतां वस्तूनां स्थानं दक्षिणस्यां दिशि पश्चिमस्यां दिशि उभयोर्मध्ये भवेद्यथाशक्यमुत्तरस्यां दिशि पूर्वस्यां दिशि वा भरवतो वस्तुन उपस्थापनं न कर्तव्यम् ।

घ. स्वागतकक्षस्य प्रवेशाय पूर्वस्यां दिशि, उत्तरस्यां दिशि वा व्यवस्था भवेत् कक्षेऽस्मिन् गवाक्षस्यापि व्यवस्था स्यात् । गवाक्षस्य निर्माणमपि पूर्वस्या तथा उत्तरस्यां दिशि भवेत् ।

ङ. स्वागतकक्षे सज्जाय वस्तूनामुपस्थापनमुत्तरस्यां दिशि पूर्वस्यां दिशि वा भवेज्जलचित्रस्योपस्थापनं पूर्वस्यां दिशि उत्तरस्यां वा दिशि भवेत् । वातानुकूलितानां पदार्थानामुत्तरस्यां दिशि योजनं शुभकरं भवति।

च. स्वागतकक्षस्य काष्ठवस्तूनामाकृतिः, वर्गाकारा आयताकारा वा भवेत् । ध्येयमिदम्भवेत् कस्यापि वस्तुन आकृतिः, विषमा, षड्भुजा च न स्यात् ।

छ. स्वागतकक्षे भीतिप्रदानां पशूनां, पक्षीणां, हिंस्रकानां समुदायस्य, युद्धदृश्यस्य, शोकसङ्केतस्य, उदासीनस्य वा चित्राणि हेयानि भवन्ति घटिका स्वागतकक्ष उत्तरस्यां पूर्वस्यां वा दिशि भवेत्।

ज. गृहे यदि पोषितः कोऽपि पशुः स्यात्सोऽसौ वायव्यकोण उपस्थानीयः।

**निष्कर्षः**

प्राचीनकाले बहुतलीयावासीयभवननां निर्माणं सीमितमात्रायां भवति स्म। परन्तु सम्प्रति स्थानस्य अभावात् एवं जनसंख्याघनत्वस्य वर्धनेन च विगतदशकेषु आवासीयभवनानां संख्यायां अपूर्ववृद्धि अभवत् । वास्तुशास्त्रे गृहनिर्माणार्थं षोडशकक्षनिर्माणस्य सिद्धान्तः प्राप्यते। षोडशकक्षस्य स्थाने सम्प्रति पंच-षट् कक्षा एव आवश्यकताः सन्ति। अतः वर्तमान सन्दर्भे कक्षविन्यासविषयस्य प्रतिपादनमाधुनिककालेन सह तस्य सम्बन्धश्च अस्मिन् शोधपत्रे प्रस्तुतोऽस्ति।

**सन्दर्भाः**


1. गौतम धर्मसूत्र
2. विचारत्नावली, पृ. 72 (पं. महावीरप्रसादद्विवेदीकृत)
3. वास्तुरत्नाकर 1/6 (भविष्यपुराण उद्धृत)
4. वास्तुराजवल्लभे अ.5, श्लोक 41
5. मुहूर्तचिन्तामणि, 12/21
6. बृ.वा.श्लोक 150-156, पृ. 30
7. सिद्धान्तशिरोमणि, 20/51
8. मयमतम् , 6.1
9. गृह वास्तु-शास्त्रीय विधान, अ.-5, पृ. 132-133, भारतीय वास्तुशास्त्र, अ.-3, पृ. 122, वास्तु-जीने की कला और विज्ञान, अ.-8, पृ. 232
10. बृ.वा.श्लोक 151, पृ. 30
11. बृहद्वास्तुमाला, श्लोक 154
12. तैत्तिरीयोपनिषद् , 1.11.2
13. भारतीय वास्तुशास्त्र अ.-3, पृ. 120 वास्तुप्रबोधिनी अ.-19, पृ. 103-104, गृह वास्तु-शास्त्रीय विधान अ. 5, पृ. 130-131, वास्तु-जीने की कला और विज्ञान, अ-8, पृ. 224-225
14. ब्रह्मवैवर्तपुराणम् ब्रह्मखण्ड
15. तैत्तिरीयोपनिषद् भृगुवल्ली द्वितीयोऽनुवाकः
16. बृहद्वास्तुमाला, पृ. 30, श्लोक 150
17. भारतीय वास्तुशास्त्र अ.-3, पृ. 118-119, गृह वास्तु-शास्त्रीय विधान अ.-5, पृ. 127, वास्तु-जीने की कला और विज्ञान, अ.-8, पृ. 217
18. बृहद्वास्तुमाला, पृ. 30, श्लोक 152
19. गृह वास्तु-शास्त्रीय विधान अ.-5, पृ. 129-134, भारतीय वास्तुशास्त्र अ.-3, पृ. 119-124, वास्तुजीने की कला और विज्ञान अ.-8, पृ. 238-239, वास्तुप्रबोधिनी, अ.-19, पृ. 108
20. बृहद्वास्तुमाला, पृ. 30, श्लोक 153
21. वास्तुप्रबोधिनी, पृ. 107
22. वास्तु-जीने की कला और विज्ञान, अ.-8, पृ. 221-222, वास्तु शास्त्र टुडे अ.-5, पृ. 103, गृहवास्तु शास्त्रीय विधान अ.-5, पृ. 141, वास्तुसारः अ.-9, पृ. 169, भारतीय वास्तुशास्त्र अं.-3, पृ. 117
23. वास्तु-जीने की कला और विज्ञान, अ.-8, पृ. 220

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# न्यावैशेषिकदर्शनयोः स्मृतिः

**हेमन्तः पण्ड्या***

**सारांशः -** भारतीयदर्शने स्मृतिविषये गहनचिन्तनं कृतमस्ति। प्रस्तुतशोधपत्रे न्यायवैशेषिकदर्शनयोः स्मृतिस्वरूपस्य प्रमुखबिन्दूनां चर्चा कृता अस्ति। न्यायवैशेषिकमते स्मृतिः बुद्धेः भेदः वर्तते। तथा बुद्धिः आत्मनः गुणो वर्तते अतः स्मृतिः अपि आत्मनः गुणो वर्तते। दर्शनस्य बहुविवादितविषयोऽस्ति आत्मसत्ता, आत्मनः अस्तित्त्वं स्मृतिज्ञानेन सिध्यते एते दर्शने। अस्मिन् शोधपत्रे स्मृतेः 27 भेदनां चिन्तनं कृतमस्ति। स्मृतिः आत्मनः उपरि अनुभवजनितज्ञानसंस्कारः भवति इति चर्चा कृता।

**कुञ्जीशब्दाः-** न्यायः वैशेषिकः, स्मृतिः, आत्मा, बुद्धिः, मनः, अनुभवश्च।

**प्रस्तावना**

प्राणिनां सर्वे व्यवहाराः स्मृत्याश्रिताः भवन्ति इति सामान्यलौकिकव्यवहारे दरीदृश्यते। यथा - इच्छा, द्वेषः, प्रयत्नः, सुखम् , दुःखम् गमनम् , दर्शनं स्पर्शः, स्वप्नः, प्रवृत्तिः, निवृत्तिश्च इत्यादयः। अनेककार्याणि स्मृतिः सम्पादयति। न्यायवैशेषिकसमानतन्त्रौ मन्येते, अर्थात् तयोः सिद्धान्तः समानधरातले वर्त्तते। स्मृ (चिन्तने)+क्तिन्+सु=स्मृतिः। न्यायवैशेषिकमते स्मृतिः, बुद्धेः प्रकारः वर्तते उक्तंहि- '**बुद्धिस्तु द्विविधा मता अनुभूतिः स्मृतिश्च**'[1] यदा अनुभूतज्ञानस्य आत्मनि पुनः तस्य ज्ञानस्य संस्कारः भवति सः संस्कारः स्मृतिः कथ्यते '**संस्कारमात्रजन्यं ज्ञानं स्मृतिः**'[2]। सा स्मृतिः मनसा सह संयोगात् आत्मनि उद्दीप्ता भवति। आत्मनः पुनर्जन्मनसिद्धान्तः

*शोधार्थी, म.पा. संस्कृतवैदिक विश्वविद्यालय, उज्जयिनी

अपि स्मृत्याधारेण सिद्धयते न्यायवैशेषिकदर्शनयोः। यथा जन्मप्राप्तः जातकः आहारचेष्टां करोति, हसति रोदिति इत्यादिव्यवहारं पूर्वज्ञानस्मृत्या एव करोति इति सामान्यव्यवहारे दृश्यते। सर्वं कार्यं स्मृतिज्ञानेन भवति, यदि स्मृतिः न भवेत् तर्हि किमपि न भवितुमर्हति। अभिज्ञानं प्रत्यभिज्ञानं स्मृतेः पर्यायशब्दाः सन्ति। शरीरेन्द्रियविषयाद् भिन्नः आत्मा अस्ति इति स्मृतिज्ञानेन सिध्यते, यतोहि इन्द्रियनष्टे सति तज्जन्यज्ञानं आत्मनि भवति **'उपहेतुषु विषयासान्निध्ये चास्मृतिदर्शनात्'**[3]। भ्रमज्ञानम् अपि स्मृतपूर्वकं भवति यतोहि डीत्थोऽयं पुरषोऽयं वा इति एकस्मिन् वस्तुनि एकाधिकवस्तुज्ञानं स्मर्यते तत्र डित्थस्य स्मृतिः तथा पुरुषस्य स्मृतिः पूर्वात् एव भवति तदेव तेषां लक्षणज्ञानं भवति।

**विषयप्रवर्तनम्**

**आत्मनः सिध्यर्थं स्मृतिज्ञानम्**

आत्मानः अस्तित्त्वविषये वास्त्यायनभाष्ये विचारःकृतः अस्ति यत् इन्द्रियाणि स्वविषयार्थस्य ग्रहणं कुर्वन्ति, आत्मा सर्वविषयार्थज्ञाता अस्ति। किन्तु कथं एतत् ? प्रत्यभिज्ञानात् (स्मृतिः) एव भवति यथा चक्षुषा यत् वस्तु पश्यति तदेव वस्तु निकषा आगत्य स्पृशति तथा वदति एतत् तत् वस्तु अस्ति अत्र जीवः दृष्टवस्तु**प्रतिज्ञानात्** स्पर्शवस्तुनः ज्ञानं करोति, चक्षुषा रूपज्ञानं भवति त्वगिन्द्रियेण स्पर्शज्ञानं भवति, पुनः आत्मनि **बुद्धि**गुणद्वारा इन्द्रियविषयार्थस्य अभिज्ञानं भवति **'दर्शनस्पर्शनाभ्यामेकार्थ-ग्रहणात्'**[4]। सामान्यव्यवहारे अस्माभिः अनुभूयते एषा प्रक्रिया सर्वत्र। स्मृतिः तु आत्मनः स्वभावः वर्त्तते **'स्मरणं त्वात्मनः ज्ञस्वाभाव्यात्'**[5] । वात्स्यायनभाष्ये स्मृतिज्ञानात् आत्मनः सिध्यर्थं प्रतिसन्धानम् , प्रत्यभिज्ञानम् , अभिज्ञानम् च पर्यायशब्दानां प्रयोगः दृश्यते। यदि आत्मनि स्मृतिज्ञानं नैव भवति तर्हि वाक्यकथनं श्रुत्वा अन्येन्द्रियार्थज्ञानं कथं भवति? उदाह्रियते - रामनगरे सुन्दरम् उद्यानं अस्ति इति वाक्यम् अस्ति कथनकारस्य, वाक्यं श्रुत्वा अन्यः जनः उद्यानस्य पूर्वस्मृतिद्वारा मस्तिष्के दृष्टविषयस्य स्पर्शविषयस्य रसविषयस्य च अनुभवं करोति। यद्यपि अत्र केवलं श्रोतव्यापारः दृश्यते किन्तु स्मृतिज्ञानात् अनेकेन्द्रियविषयज्ञानं स्मृत्या एव आत्मा प्रतिसन्धानं करोति। प्राणिनां सर्वे व्यवहाराः स्मृत्याश्रयाः भवन्ति[6], आत्मा अस्ति इति उपस्थापनाय स्मृतिव्यवहारः सर्वमान्यम् उदाहरणं दृश्यते लोकव्यवहारे - अहं ज्ञातवान् अमुं अर्थम् , असौ अर्थो मया ज्ञातः, अस्मिन् अर्थे मम ज्ञानं अभूत् । पूर्वस्मृतिवशाद् वर्तमाने दृश्यमाने ज्ञाने जीवः प्रतिसन्धानं करोति, स्मृतिः केवलं पूर्वविषय ज्ञानं नैव कारयति अपितु **ज्ञाता ज्ञानं ज्ञेयं** च अस्ति, इत्यपि अवबोधयति। स्मृतिः त्रीणि ज्ञानानि प्रतिसंधति 1. समानकर्तुकः नास्ति, 2. नानाकर्तुकः नास्ति, 3. अकर्तुकः नास्तिक, केवलं ज्ञातविषयस्य एकैव कर्ता अस्ति इति सिध्यति।[7] विस्तार्यते- 1 समानकर्तृकः = पूर्वज्ञातविषयस्य वर्तमाने यः पूर्वज्ञाता

अस्ति सः एव जानाति तं समानज्ञानं अन्यः न जानाति यथा रामः स्वमित्रं जानाति तन्मित्रं पुनः कुत्रचित् दृष्टम् अस्ति तस्मिनवसरे रामेण सह तस्य अन्यं मित्रम् अपि अस्ति किन्तु सः न जानाति रामस्य प्रथम मित्रं रामः अनयोः परिचयं कारयति, यदि यं रामः जानाति तं रामस्य मित्रं अपि ज्ञापयतु किन्तु एवं न भवति सामान्यव्यवहारे, अतः समानज्ञाता कर्ता वा नास्ति इति **स्मृत्या** सिध्यते। 2 नानाकर्तुकः = शरीरे इन्द्रियाणि स्वविषयज्ञानं कुर्वन्ति त्वगेन्द्रियज्ञानं चक्षुः न करोति यदि एतादृशः व्यापारः भवति तर्हि सर्वेन्द्रियाणि कर्ता भवितु मर्हति नानाकर्ता भविष्यति, किन्तु एवं न भवति **स्मृत्या** एव तत्र आत्मनि इन्द्रियार्थः भवति तथा दृष्टस्य ज्ञानस्य त्वगेन्द्रियज्ञानं प्रति चेष्टां करोति आत्मा । यतोही दृष्टज्ञानस्य स्मृतिज्ञानं पूर्वात् एव आत्मनि भवति तद्ज्ञानस्य स्पर्शं कृत्वा प्रतिसन्धानं भवति, एतेन उदहारणेन शरीरे नानाकर्ता नास्ति इति स्मृत्या सिध्यते। 3 अकर्तुकः = सर्वेन्द्रियज्ञानं स्मृतिरूपेण प्रतिसन्धानं कुर्वन्ति तत्र एकस्य आधारस्य अपेक्षा अनुमीयते सः आधारः आत्मा अस्ति यत्र इन्द्रियार्थानुभवः स्मृतिरूपेण भवति '**ज्ञातविषयज्ञानं स्मृतिः**'[8]।अत्र स्मृतिः कर्तृकस्य सिद्धिं कारयति। न्यायदर्शने स्मृतिज्ञानं अधिकृत्य आत्मनः सिद्धयर्थं अनेकानि उदहारणानि दत्तानि सन्ति। सर्वविषयज्ञता हेतुत्वात् आत्मानः सद्भावः (सत्ता) मन्यते किन्तु मनः अपि सर्वविषयज्ञाता अस्ति तर्हि मनःअपि आत्मा अस्ति किम् ? उत्तरं अस्ति न मनः न आत्मा भवितुं शक्यते सः तु साधनं अस्ति यदा आत्मा मननं करोति तस्मिन् समये अंतःकरणस्य उपादेयता दृश्यते मननस्य साधनं अन्तःकरणमस्ति सः मनः = मतिः = बुद्धिः, **मतिसाधनमन्तःकरणभूतम्**[9], सांख्यदर्शनं स्मृतिज्ञानं मत्वा बुद्धे नित्यत्त्वं सिध्यति। तथा न्याये बुद्धया आत्मनः नित्यत्त्वं सिध्यति।

**स्मृतिहेतुः**

स्मृतिः आत्मनि भवति सा क्रमेण (अयौगपद्यम्) भवति यतोहि तस्याः हेतवः कारणानि वा अयौगपद्येन भवन्ति। ते हेतवः सप्तविंशतिः सन्ति -

'**प्राणिधाननिबन्धाऽभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाऽऽश्रयऽऽश्रि-तसम्बन्धा-ऽऽनन्तर्यवियोगैककार्यविरोधाऽतिशयप्राप्तिव्यवधान-सुखदुः-खेच्छाद्वेषभयार्थित्व-क्रियारागधर्माधर्मनिमित्तेभ्यः**'[10]

1. प्रणिधानम्, 2. निबन्धः, 3. अभ्यासः, 4. लिङ्गम् , 5. लक्षणम् , 6. सादृश्यः, 7. अपरिग्रहः, 8. आश्रयः, 9. आश्रितः, 10. सम्बन्धः, 11. आनन्तर्यः, 12 वियोगः, 13. एककार्यम् , 14. विरोधमः, 15. अतिशयः, 16 प्राप्तिः, 17 व्यवधानः, 18 सुखम्, 19. दुःखम् , 20. इच्छा, 21. द्वेषः, 22. भयः, 23. अर्थित्त्वम् , 24. क्रिया, 25. रागः, 26. धर्मः, 27. अधर्मश्च एतेभ्यः हेतुभ्यः आत्मा निश्चयपूर्वकं स्मृतिं करोति, एतेषां सोदाहरणेन क्रमेण च चिन्तनं क्रियते -

1. **प्रणिधानम्**

**'सुस्मूर्षया मनसो धारणं प्रणिधानम् - सुस्मूर्षितलिङ्गचिन्तनं चार्थस्मृतिकारणम्'**[11] एकस्य विषयस्य उपरि मनसं स्थिरं कृत्वा तस्य विषयस्य स्मरणहेतुषः प्रणिधानं भवति। यथा ईश्वरस्य स्मरणम् एकाग्रतापूर्वकं मनसा क्रियते तन्नाम ईश्वरप्रणिधान मस्ति योगदर्शने अपि कथ्यते **'ईश्वरप्रणिधानाद्वा'**।[12]

2. **निबन्धः**

एकस्मिन् ग्रन्थे स्थाने वा एकस्य विषयस्य ग्रन्थनं यत्र भवति तत्र यदि तद्विषयसम्बन्धी पूर्वस्मरणेन अग्रिमस्य विषयस्य स्मरणं भवति तत्र निबन्धहेतुः भवति - **'एकग्रन्थोपयताः खल्वार्थ अन्योन्यस्मृतिहेतवः आनुपूर्व्येणेतरथा वा भवन्ति इति'**[13] यथा योगशास्त्रे एकस्य सूत्रस्य स्मरणेन अग्रिमस्य सूत्रस्य यदा स्मरणं भवति अथवा पूर्वसूत्रस्य स्मरणं भवति तत्र निबन्धहेतुः भवति।

3. **अभ्यासः**

यदा एकस्य विषयस्य अर्थस्य वा निरन्तरं स्मरणं भवति अथवा स्वाध्यायः भवति तदा स्मरणस्य अयं हेतुः भवति - **'अभ्यासस्तु समाने विषये ज्ञानानां अभ्यासवृत्तिः अभ्यासजनितः संस्कार आत्मगुणोऽभ्यासशब्देनोच्यते'**[14] यथा सामान्ये व्यवहारे कस्यापि मन्त्रस्य नाम्नः वा वारं वारं स्मरणं क्रियते एकस्मिन् दिने अभ्यस्तवस्तु स्मृतिपटले आगच्छति। अयं हेतुः स्मृतेः सर्वेषु हेतुषु समानरूपेण भवति।

4. **लिङ्गम्**

संकेतद्वारा यत्र स्मरणं भवति तत्र लिंगहेतुः भवति तस्य चत्वारः प्रकाराः सन्ति - **'लिङ्गं पुनः संयोगी समवायी एकार्थसमवायी विरोधी चेति'**[15]। संयोगी- धूमं दृष्ट्वा अग्रेः स्मरणं भवति, समवायी - गवेः विषाणं दृष्ट्वा गोस्वरूपं स्मरति, एकार्थसमवायी- शरीरस्य पाणी दृष्ट्वा पादौ अपि स्मरति, रूपं दृष्ट्वा स्पर्शं स्मरति यथा पुष्पं दृष्ट्वा तस्य कोमलतां स्मरति, विरोधी - वर्तमानसुखम् अनुभूत्वा भूतकालस्य दुःखं स्मरति, तथा च मेघे दृष्टे सति वर्षा न भवति तदा वर्षायाः बाधकतत्वं स्मर्यते। इत्थं संकेतं ज्ञात्वा तदाश्रितविषयस्य स्मरणहेतुहः लिङ्गं भवति।

5. **लक्षणम्**

कस्यापि चिह्नं दृष्ट्वा तत्सम्बन्धीविषयस्य स्मरणं भवति - **'लक्षणं पश्वंवयवस्थं गोत्रस्य स्मृतिहेतुः'**[16] यथा कस्यापि देशस्य पताकां (ध्वजा) दृष्ट्वा तस्य देशस्य नामस्करणं भवति। अत्र स्मरणस्य लक्षणं हेतुः भवति।

6. **सादृश्यः**

समानवस्तु दृष्ट्वा अन्यसमानवस्तुनः स्मरणं यत्र भवति तत्र सादृश्यज्ञानेन

स्मर्यते- **'सादृश्यचित्रगतं प्रतिरूपकं देवदत्तस्येत्येवमादि'**[17] यथा किमपि चित्रं दृष्ट्वा तत्समानदृश्यमानं स्वरूपं आधाय व्यक्तेः स्मरणं भवति।

7. **परिग्रहः**

अनेन हेतुना परस्परसम्बन्धस्य स्मरणं भवति स्वद्वारा स्वामिनः सम्बन्धः स्मरति स्वामिना स्वस्य सम्बन्धः स्मरति - **'स्वेन वास्वामी स्वामिना वा स्वं स्मर्यते'**[18] यथा कस्यापि गृहं दृष्ट्वा गृहस्वामिनं स्मरति, स्वामिनं दृष्ट्वा गृहं स्मरति। अत्र स्वस्वामीसम्बन्धस्य स्मृतिहेतुः अस्ति इदं कारणम् ।

8. **आश्रयः**

आश्रितात् आश्रयस्य स्मृतिः भवति अर्थात् आश्रितत्वस्तु दृष्ट्वा तस्य आश्रयस्य स्मरणं यदा भवति तदा आश्रयहेतुः भवति **'ग्रामण्या तदधीनं स्मरति'**[19] यथ राजानं दृष्ट्वा प्रजायाः स्मरणं भवति सामान्यव्यवहारे, अत्र स्मरणस्य हेतुः आश्रयहेतुः वर्तते।

9. **आश्रितः**

अत्र आश्रयात् आश्रितस्य स्मृतिः भवति **'तदधीनेन ग्रामण्यमिति'**[20] स्वामिनं दृष्ट्वा सेवकस्य स्मरणं भवति।

10. **सम्बन्धः**

अनेन हेतुना परस्परसम्बन्धस्य स्मरणं भवति **'अन्तेवासिना युक्तं गुरुं स्मरति ऋत्विजा याज्यमिति'**[21] यथा गुरुं दृष्ट्वा शिष्यस्य स्मरणं भवति, कुम्हारं दृष्ट्वा घटं स्मरति।

11. **आनन्तर्यः**

पश्चात् क्रियायाः स्मरणं भवति **'इतिकरणीयेष्वर्थेषु'** पाठशालां गत्वा पठनस्य स्मृतिः भवति, मन्दिरं दृष्ट्वा नमस्कारस्य स्मरणं भवति इति आनन्तर्यः।

12. **वियोगः**

यदा परस्परं विप्रयोगः भवति तदा विरहिनं भूयः स्मरति - **'येन विप्रयुज्यते तद्वियोगप्रतिसंवेदी भृशं स्मरति'**[22] यथा कामी विरहावस्थायां प्रियां भृशं स्मरति, अत्र स्मरणस्य कारणं विप्रयोगहेतुः भवति।

13. **एककार्यम्**

किमपि कार्यं दृष्ट्वा तद्वत् अन्यकर्तुः स्मरणं भवति - **'कर्न्त्रतरदर्शनात् कर्न्त्रतरे स्मृतिः'**[23] यथा पठन्तं छात्रं दृष्ट्वा अन्य पठतः छात्रस्य स्मरणं भवति। उभयोः कार्यं समानम् अस्ति किन्तु कर्ता भिन्नः अस्ति, अत्र एककार्यहेतुः भवति।

14. **विरोधः**

प्रतिद्वन्दीषु एकस्य स्मरणात् प्रतिपक्षस्य स्मरणं भवति -

**'विजिगीषमाणयोरन्तरदर्शनात् अन्यतरः स्मर्यते'**[24] यथा रामं स्मृत्वा रावणं स्मरति, पाण्डवं स्मृत्वा कौरवः स्मर्यते। पक्षस्य स्मरणं यदा भवति तदा प्रतिपक्षस्य स्मरणं अपि भवति विरोधीहेतुत्वात् ।

**15. अतिशयः**

कस्मिञ्चित् कार्ये कस्यापि अतिशययोग्यता अस्ति तत् कार्यं दृष्ट्वा तां योग्यताधारिणं स्मरति - **'येनातिशय उत्पादितः'**[25] यथा धावकं दृष्ट्वा अतिशयधावकस्य स्मरणं भवति।

**16. प्राप्तिः**

प्राप्तयवस्तुनः प्राप्तिपर्यन्तं स्मरणं भवति - **'यतो येन किंचित् प्राप्तमाप्तव्यं वा भवति तमभीक्ष्णं स्मरति'**[26] यथा आम्रफलं इष्ट मस्ति तस्य स्मरणं प्राप्तिपर्यन्तं भवति, तस्य स्मरणस्य हेतुः प्राप्तिः अस्ति।

**17. व्यवधानम्**

आवरणं (cover) दृष्ट्वा आच्छादितवस्तुनः (covered) स्मरणं भवति - **'कोशादिभिरसभृतीनि स्मर्यते'**[27] यथा खङ्गकोशं दृष्ट्वा खङ्गं स्मरति।

**18. सुखम्**

सुख मनुभूत्वा सुखस्य कारणं स्मरति, गन्धं घ्रात्वा पुष्पं स्मरति।

**19. दुःखम्**

दुःखम् अनुभूत्वा दुःखस्य कारणं स्मरति, कण्टकव्यथाजनितदुःखम् अनुभूत्वा कण्टकस्मरणं भवति।

**20. इच्छा**

इच्छापूर्वकं ईप्सितवस्तु स्मरति, यथा सुन्दरवस्त्रं इच्छति वस्त्रस्य स्मरणं करोति।

**21. द्वेषः**

यस्मै द्वेषं करोति तस्य स्मरणं करोति, यथा द्वेषपूर्वकं शत्रुं स्मरति।

**22. भयम्**

यस्मात् बिभेति तस्य स्मरणं करोति - **'यतो बिभेति'**[28] यथा चोरः आरक्षकं स्मरति।

**23. अर्थित्वम्**

यस्य वा प्राप्तकामना अस्ति तस्य स्मरणं भवति - **'येनार्थी भोजनेनाऽऽच्छादनेन वा'**[29] विद्यायाः अर्थी विद्यां स्मरति भोजनस्य अर्थी भोजनं स्मरति।

**24. क्रिया**

क्रियया कर्तुः स्मरणं भवति, यथा संसारं दृष्ट्वा तस्य निर्मातुः स्मरणं भवति।

**25. रागः**

कामवशात् यस्यां अनुरक्तः भवति तां स्मरति यथा कामी कामिनीं स्मरति।

**26. धर्मः**

पूर्वजन्मधर्मेण वर्तमानजन्मनि कर्मणि सहजप्रवृत्तिः भवति - **'जात्यन्तरस्मरणम् इह चाधीतश्रुतावधारणमिति'**[30] यथा विद्याग्रहणे संस्कृतपठनेन पाठम् स्मरति, अत्र स्तोकात् अभ्यासात् ज्ञानं भवति पूर्वधर्मस्मृतिहेतुत्वात् ।

**27. अधर्मः**

पूर्वदुःखसंस्कारात् वर्तमानसमये दुःखी भवति - **'प्रागनुभूतदुःखसाधनं स्मरति'**[31] यथा पूर्वकाले किमपि कष्टं जातं आसीत्, तद् कष्टम् अनुभूयते वर्तमानसमये।

यद्यपि स्मृतिहेतवः असंख्याः सन्ति तथापि अत्र प्रमुखाः हेतवः विवेचिताः महर्षिगौतममुनिना। स्मृत्या सह बुद्धिः आत्मनः गुणो वर्तते इति सिद्धम् तस्य विशेषगुणः अस्ति न्यायमते स्वीकृतेषु गुणेषु।

**निष्कर्षः**

स्मृतिं विना लोकयात्रायाः कल्पना नैव भवितुमर्हति । भारतीयदर्शने स्मृतिविषये गहनचिन्तनं कृत मस्ति श्रीमद्भगवदगीतायाम् अर्जुनः कृष्णस्य उपदेशं श्रुत्वा अन्तिमे वदति **'नष्टो मोहः स्मृतिर्लब्धा'**[32] अर्थात् अर्जुनस्य पूर्वज्ञानं स्मरणं जातम् । न्यायवैशेषिकानां मते स्मृतिः आत्मनि ज्ञानसंस्काररूपेण भवति, यदा स्मृतिहेतोः प्रत्यक्षं भवति तदा तत्सम्बन्धीतवस्तुविषये स्मरणं भवति यथा प्रेमी, प्रियायाः सम्बन्धीतवस्तु दृष्ट्वा पूर्वकृतां रतिक्रीड़ा स्मरति। धर्मशास्त्रग्रन्थाः स्मृतिनाम्ना एव ज्ञायन्ते, मनुस्मृतिः याज्ञवल्क्यस्मृतिः, नारदस्मृतिश्च इत्यादयः। एते वेदविहितस्य मार्गस्य स्मरणं कारयन्ति। दर्शने आत्मतत्वविषये मुख्यचिन्तनं भवति तस्य अस्तित्वविषये अपि विमर्शः भवति, न्यायवैशेषिकानां मते तु आत्मनः सिद्धिः स्मृत्याधारे एव सिद्ध्यते वर्तमानज्ञानस्य तथा पूर्वज्ञानस्य प्रतिसन्धानः आत्मपटले भवति इति तेषां पक्षः वर्तते। सामान्यव्यवहारे स्वप्नादिरूपेण अनुभवाः दृश्यन्ते ते स्मृतिं विना नैव सिध्यते इति सर्वे अनुभवन्ति। आधुनिकपरिप्रेक्ष्ये अथवा मनोविज्ञाने मेमोरी (स्मृतिः) इति रूपेण मन्यते। पाश्चात्यदार्शनिकः **'रेने डेकार्थमहोदयः'** आसीत् , तस्य बुद्धिवादसिद्धान्तः प्रसिद्धः वर्तते। सः चेतनतायाः अस्तित्त्वविषये बुद्धिः एव कारणं मन्यते, जगतः सत्ता बुद्धिं विना न शक्यते, इति तस्य प्रमुखः सिद्धान्तः वर्त्तते। (The principle of philosophy) **हीगेलमहोदयः** (Hegel) बुद्धिवादी दार्शनिकः वर्तते, सः संस्कारज्ञानं भवति इति

मन्यते, 'फिनोमिनोलॉजी ऑफ स्पिरिट' इत्यादि ग्रन्थे तस्य बुद्धिवादीविचारः उल्लिखितः अस्ति। स्मृतिविषये भारतीयदर्शने, आधुनिकदृष्टे, तथा पाश्चात्यदर्शने च प्रासङ्गिकता दरीदृश्यते। दर्शने स्मृतितत्त्वस्य स्थानं विशिष्टं वर्तते, इति अस्य शोधपत्रस्य उद्देश्यमस्ति। इतिश्रीः

**सन्दर्भाः**


1. विश्वनाथपञ्चानन, कारिकावली, बुद्धिनिरूपण, कारिका 51
2. अन्नंभट्ट, तर्कसंग्रह, दीपिकाटीका, बुद्धिप्रकरण
3. प्रशस्तपादभाष्य, आत्मप्रकरण
4. गौतमन्यायसूत्र, वात्स्यायनभाष्य, 3.1.1
5. गौतमन्यायसूत्र, 3.2.42
6. वात्स्यायनभाष्य, 3.1.14
7. वात्स्यायनभाष्य, 3.1.15
8. केशवमिश्रः, तर्कभाषा, पदार्थनिरूपणम्
9. वात्स्यायनभाष्य, 3.1.17
10. गौतमन्यायसूत्र, 3.2.43
11. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
12. पातंजलयोगसूत्र, समाधिपाद, 23
13. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
14. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
15. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
16. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
17. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
18. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
19. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
20. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
21. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
22. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
23. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
24. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
25. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
26. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
27. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43

28. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
29. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
30. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
31. गौतमन्यायसूत्र, वात्स्यायनभाष्य, बुद्धिपरीक्षण, 3.2.43
32. श्रीमद्भगवद्गीता, 18

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# भास के रूपकों में नारी शिक्षा एवं समाज

**डॉ. नीमा जोशी***

**सारांश -** महाकविभास संस्कृत साहित्य जगत् में सर्वाधिक प्राचीन नाटककार है। आज से 2500 वर्ष पूर्व के भारतीय समाज में नारी की क्या स्थिति थी, उसकी शिक्षा की क्या व्यवस्था थी तथा उसे समाज में किस प्रकार के अधिकार प्राप्त थे एवं परिवार एवं समाज में क्या स्थान था? इन सभी विषयों को प्रस्तुत शोधपत्र में रेखांकित किया गया है।

**कुञ्जीशब्द -** कुटुम्बकम् , प्रतिज्ञायौगन्धरायण, स्वप्नवासवदत्तम् ।

महाकवि भास संस्कृत नाट्य साहित्य के एक अमर कवि है। जिनकी काव्यकला इस नवीन युग में भी काव्य रसिकों को अलौकिक चमत्कार से अनुरंजित करती है। महाकवि भास के तेरह रूपकों का भारतीय संस्कृति के सन्दर्भ में विशेष योगदान है। नाटककार भास ने जहाँ अपने पुरुष पात्रों के माध्यम से भारतीय संस्कृति के आधारभूत तत्त्वों को प्रतिष्ठापित किया है। वहीं उन्होंने नारी पात्रों के माध्यम से प्राचीन भारतीय नारी के आदर्श चरित्र को प्रतिष्ठापित कर प्राचीन भारतीय संस्कृति में नारी के माध्यम से एक आदर्श संस्कृति के निर्माण में महत्त्वपूर्ण योगदान दिया है। भास के रूपकों में नारी शिक्षा एवं समाज का स्थान सर्वोत्तम है। नारी सम्पूर्ण सृष्टि का सृजन करती है। पुत्र पालन के रूप में समाज को पुष्ट करती है, तथा अपने आदर्श कर्तव्यों के द्वारा समाज का मार्ग प्रदर्शन करती है। मानव जाति के विकास में नारी की भूमिका महत्वपूर्ण है।

*संविदा शिक्षक, संस्कृत विभाग, राजकीय महाविद्यालय, भुवानी जनपद-पिथौरागढ़ (उत्तराखण्ड)

भारतीय संस्कृति में शिक्षा को अत्यधिक पवित्र माना गया है। भगवान श्रीकृष्ण ने गीता में कहा है कि **''न हि ज्ञानेन सदृशं पवित्रमिह विद्यते''**[1] अर्थात् ज्ञान के समान इस संसार में कुछ भी पवित्र नहीं है। असत् से सत् की ओर तथा अन्धकार से प्रकाश की ओर ले जाना ही शिक्षा का प्रमुख कार्य है। अतः शिक्षा को किसी भी देश की सभ्यता एवं संस्कृति का अनिवार्य अंग कहा जा सकता है। शिक्षा के माध्यम से न केवल व्यक्ति का सर्वांगीण विकास होता है अपितु यह सामाजिक एवं सांस्कृतिक विरासत की संरक्षिका भी है।

भासकालीन समाज में नारी शिक्षा का आदर्शात्मक प्रचलन दिग्दर्शित होता है। उस समय परिवार के विकास की दृष्टि से राजा नारियों की शिक्षा का भी पूर्ण प्रबन्ध करता था। प्रतिज्ञा यौगन्धरायण कार्य के लिए नियुक्त की गयी थी।

**'उत्तराया वैतालिक्या' सकाशे वीणां शिक्षितुं नारदीयां गतासीत्**[2]

चारुदत्त नामक नाटक की नायिका वसन्तसेना विविध प्रकार की कुशल कलाओं में पारंगत थी। वसन्तसेना रंगशाला में नाटकीय रूप से प्रवेश करने के कारण तथा नानाविध धोखा देने की कलाओं के कारण अनेक स्वरों के माध्यम से बोलने में प्रवीण थी।

**एषा रंग प्रवेशेन कलानां चैव शिक्षया।**
**स्वरान्तरेण दक्षा हि व्याहर्तुं तन्न मुच्यताम् ।।**[3]

तत्कालीन समाज में समय-समय पर विद्यार्थियों को आवश्यक वस्तुएँ प्रदान की जाती थी। स्वप्नवासवदत्ता में एक स्थान पर वर्णित है कि - किसे कलश का प्रयोजन है, कौन तपस्वी निर्णयानुसार वस्त्र चाहता है तथा अध्ययन के लिए व्रत को समाप्त करने वाला कौन स्नातक गुरु को देने योग्य वस्तु चाहता है । इस तपोवन में धर्म में प्रीति रखने वाली राजकुमारी (तपस्वियों की याचना से) अपने ऊपर अनुग्रह है, जिसको जिस वस्तु की इच्छा हो उसे कहें -

**कस्यार्थः कलशेन को मृगयते वासो यथानिश्चित**
**दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत् ।**
**आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया**
**यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ।।**[4]

इस प्रकार उपर्युक्त वर्णन से स्पष्ट होता है कि तत्कालीन समाज में शिक्षा मानव जीवन के लिए अत्यन्त महत्त्वपूर्ण थी। शिक्षा के क्षेत्र में गुरु का महत्त्व प्रतिष्ठित था। गुरु को समाज में सर्वोत्कृष्ट तथा पूजनीय स्थान प्राप्त था। आदर्श गुरु ही शिष्य के भावी जीवन को उत्कृष्ट बना सकता है। समाज का विकास शिक्षा से सम्भव है। अतः समाज जैसा होता है वैसी ही शिक्षा होती है और जैसी शिक्षा होती है वैसा ही समाज होता है।

भास के रूपकों में आचार्य शिष्यों को आश्रमों में शिक्षा देते थे और यह शिक्षा शिष्यों के हितार्थ उनकी आवश्यकताओं को ध्यान में रखते हुए दी जाती थी, इस प्रकार महाकवि भास ने अपने रूपकों के माध्यम से समाज के प्रत्येक सदस्य का समुचित विकास करने के लिए शिक्षा को अपने रूपकों में प्रतिबिम्बित कर जन-जन के प्रशिक्षण की एक आवश्यक प्रक्रिया बनाने का प्रयास किया है।

साहित्य समाज का दर्पण होता है। सामाजिक प्राणी के रूप में मनुष्य समाज में **'वसुधैव कुटुम्बकम्'** की भावना को प्रतिष्ठापित किए हुए है। व्यवहारिक रूप में समाज शब्द का प्रयोग मानव समूह के अन्तर्गत आने वाले व्यक्तियों के सम्बन्धों की व्यवस्था का नाम है। अतः समाज एक संघ अथवा संगठन का नाम है। समाज की अच्छाइयाँ, बुराईयाँ, रीति-रिवाज परिवार आदि विविध विशेषताएँ किसी भी कवि के साहित्य में सहजता से स्थान प्राप्त कर लेती है। एक संवेदनशील मनुष्य होने के नाते कवि और भी अधिक गहराई से समाज को देखकर उस पर चिन्तन एवं मनन करता है।

महाकवि भास ने नारी के सामाजिक स्वरूप का वर्णन अपने रूपकों में प्रस्तुत किया है। मानव की जन्मदात्री व निर्मात्री दोनों ही कार्य नारी में निहित है। महाकवि भास ने प्रतिज्ञा यौगन्धरायण नाटक में माता के रूप में नारी के स्थान को प्रदर्शित किया है। जिस प्रकार वर्तमान समाज में माताएँ अपनी कन्याओं के विवाह हेतु चिन्तित रहती है, उसी प्रकार भासकालीन समाज में माताएँ अपनी कन्याओं के विवाह हेतु चिन्तित रहीती है। राजा प्रद्योत कन्या के विवाह के विषय में नारी से वार्तालाप करते है तो रानी कहती है कि धर्म व स्नेह माताओं के लिए कष्टदायी होता है -

**अदत्ते त्यागता लज्जा दत्तेति व्यथितं मनः।**
**धर्मस्नेहान्तरे न्यस्ता दुःखिता खलु मातरः॥**[5]

आज की ही भाँति भासकालीन समाज में कन्यादान करने से पूर्व माताएँ वर के विषय में समग्र जानकारियाँ प्राप्त करती थी। रानी राजा प्रद्योत से कहती है -

**अभिप्रेतं मे प्रदानम् । वियोगो मां सन्तापयति। अथ कस्मै पुनर्दत्ता।**[6]

अर्थात् कन्या का विवाह तो मुझे भी अभीष्ट है। विवाह हो जाने पर इसका वियोग मुझमें संताप उत्पन्न कर रहा है। आपने इसे किसे देने का निश्चय किया है। इस प्रकार भासकालीन समाज में माताएँ कन्याओं का विवाह ऐसे वर के साथ करती थी जहाँ देवर उनको पश्चाताप नहीं करना पड़ता था।

माता का पुत्र के प्रति प्रेम की अभिव्यक्ति को भास ने प्रतिमानाटक में वर्णित किया है। श्रीराम के वन जाने तथा पिता की मृत्यु से दुःखी होकर भरत अपनी माता कैकेयी को दोषी मानकर प्रणाम नहीं करते तो माता कौशल्या अपने मातृत्व की निष्ठा का पालन करते हुए भरत को प्रमाण करने के लिए कहती है -

**जात! समुदाचारमध्यस्थः किं न वन्दसे मातरम् ।**[7]

कोई भी माता अपने पुत्र का सम्यक् प्रकारेण लालन-पोषण करती है तथा उसे राजा बनते हुए देखकर प्रसन्न होती है तथा स्वयं को धन्य मानती है। इसी वर्णन महाकवि भास ने प्रतिमा नाटक में कैकेयी के माध्यम से वर्णित किया है । माता कैकेयी राम को वन से वापस बुलाने के लिए भरत के साथ वन जाती है और श्री राम कहती है -

**धन्या खल्वास्मि । इममभ्युदयमयोध्यायां प्रेक्षितुमिच्छामि।**[8]

अर्थात् मैं धन्य हो गयी। इस अभ्युदय को अब मैं अयोध्या में भी देखना चाहती हूँ ।

भास के रूपकों में नारी के रूप में पत्नी सुख व दुःख दोनों में अपने पति का अनुसरण करती थी, प्रतिमा नाटक में राम के वनगमन के समय सीता भी उनके साथ जाना चाहती है, परन्तु उनके कष्टों का स्मरण करते हुए राम लक्ष्मण से उन्हें रोकने के लिए कहते हैं । लक्ष्मण कहते है कि इस प्रशंसनीय अवसर पर आर्या को रोकने का साहस नहीं हो रहा है क्योंकि -

**स्त्रियों के लिए पति ही सर्वस्व है ।**[9]

तत्कालीन समाज में पति के लिए विजयश्री की कामना करना तथा पति की आज्ञा का पालन करना नारी का परम धर्म माना जाता था । इसी का वर्णन महाकवि भास ने अभिषेक नाटक में किया है । सीता जब रावण की लंका में हनुमान द्वारा राम के आक्रमण की बात सुनती है तो मन ही मन राम के विजयी होने की प्रार्थना करती है -

**ईश्वराः आत्मना कुल सदक्षेन चारित्रेण यद्यहमनुसराम्यार्य पुत्रम् ।**
**आर्य पुत्रस्य विजयों भवतु ।**[10]

महाकवि भास ने सीता का पत्नीत्व स्वरूप अग्नि परीक्षा के माध्यम से प्रदर्शित किया है। राम के द्वारा स्वयं को दूषित मानना जानकर सीता अपने सतीत्व की परीक्षा हेतु अग्नि-परीक्षा देने को तैयार हो जाती है किन्तु एक आदर्श पत्नी होने के कारण प्रत्येक कार्य से पहले पति की आज्ञा लेना अपना धर्म समझकर लक्ष्मण से आज्ञा लाने के लिए कहती है ।

इस प्रकार उपर्युक्त वर्णन से स्पष्ट होता है कि भासकालीन समाज की नारियाँ अपने शुद्ध आचरण तथा कर्तव्य पालन द्वारा अपने पितृकुल एवं पतिकुल दोनों को पवित्र एवं उज्ज्वल करती थी। अतः निष्कर्ष रूप से कहा जा सकता है कि महाकवि भास ने नारी शिक्षा एवं समाज को अपने रूपकों के माध्यम से नवीन दिशा प्रदान कर आदर्शात्मक रूप में प्रतिष्ठित करने का प्रयास किया है।

**सन्दर्भ**


1. श्रीमद्भगवद्गीता, 1
2. प्रतिज्ञायौगन्धरायण-2, पृ. 51
3. चारुदत्त-1/24
4. स्वप्नवासवदत्ता-1/8
5. प्रतिज्ञायोग्न्धरायण-2/7
6. प्रतिज्ञायोग्न्धरायण-2, पृ. 22
7. प्रतिमा नाटक-2, पृ. 112
8. प्रतिमा नाटक-7, पृ. 223
9. प्रतिमा नाटक-1/25
10. अभिषेक नाटक-5, पृ. 102

UGC - CARE Listed

पाणिनीया
Vol. XXXV, Year X
फरवरी-अप्रैल, 2023

# आयुर्वेद का प्राचीन महत्त्व एवं वृहत्त्रयी में आयुर्वेद का वर्णन

**गौतम अधिकारी* राहुल शर्मा** डॉ. अनुराग पाण्डेय*****

**सारांशः -** आयुर्वेद का मुख्य उद्देश्य स्वस्थ व्यक्ति के सम्पूर्ण स्वास्थ्य की रक्षा करना तथा रोगी व्यक्ति के रोग को ठीक करना है। इस उद्देश्य को पूरा करने के लिए आयुर्वेदाचार्यों ने दिनचर्या, ऋतुचर्या, आहार, विहार आदि का विधान बताया है। ऋतु का अर्थ होता है - मौसम तथा चर्या का अर्थ होता है आचरण अर्थात् अलग-अलग मौसम के अनुसार हमें हमारा आचरण कैसा रखना चाहिए जिससे हम स्वस्थ बने रहे, यह ऋतुचर्या है। शरद् ऋतु के दिनों में सूर्य की तेज किरणों के कारण बहुत गर्मी पड़ती है जिससे वर्षा ऋतु में संचित हुआ पित्त इन दिनों में कुपित होता है, यह शरद् ऋतु की विशेष बात है। यह ऋतु वर्षाकाल और शीतकाल का सन्धिकाल होती है । इन दिनों की धूप ग्रीष्मकाल की धूप से भी तेज होने से शरीर में पित्त प्राकृतिक रूप से कुपित अवस्था में रहता है। इन दिनों में पित्त बढ़ने से भूख और जठराग्नि मन्द रहती है इसलिए अच्छी भूख लगने पर ही भोजन करना चाहिए।

**कुञ्जीशब्द -** आयुर्वेद, वृहत्त्रयी, घरेलू उपचार, ऋतुचर्या।

*आयुर्वेद शोध विद्यार्थी, विकृति विज्ञान विभाग, आयुर्वेद संकाय, चिकित्सा विज्ञान संस्थान, काशी हिन्दी विश्वविद्यालय, वाराणसी
**आयुर्वेद शोध विद्यार्थी, विकृति विज्ञान विभाग, आयुर्वेद संकाय, चिकित्सा विज्ञान संस्थान, काशी हिन्दी विश्वविद्यालय, वाराणसी
***व्याख्याता, विकृति विज्ञान विभाग, आयुर्वेद संकाय, चिकित्सा विज्ञान संस्थान, काशी हिन्दी विश्वविद्यालय, वाराणसी

**प्रस्तावना**

